श्री आनन्दतीर्थभगवत्पादाचार्यविरिचितः

विष्णुतत्वविनिर्णयः

Translated into English with Detailed Notes

By

Prof. K. T. PANDURANGI
Former Prof. of Sanskrit, Bangalore University

Published by

DVAITA VEDANTA STUDIES AND
RESEARCH FOUNDATION
BANGALORE

ಹಸ್ತಪ್ರತಿ ಸಂಖ್ಯೆ M. 1999

श्री आनन्दतीर्थभगवत्पादाचार्यविरिचितः

विष्णुतत्त्वविनिर्णयः

Translated into English with Detailed Notes

By

Prof. K. T. PANDURANGI
Former Prof. of Sanskrit, Bangalore University

Published by

DVAITA VEDANTA STUDIES AND
RESEARCH FOUNDATION
BANGALORE

1991

VIṢṆUTATTVAVINIRṆAYA of Sri Anandatirtha
translated into English by Prof. K. T. Pandurangi

Price: Rs. 40-00

Copies can be had from

THE HON. SECRETARY
Dvaita Vedanta Foundation
No. 88 K. R. Road, R.R. Choultry
Basavanagudi, Bangalore-560 004

Printed at

PRABHA PRINTING HOUSE
Dr. D. V. Gundappa Road, Basavanagudi, Bangalore-560 004

FOREWORD

By

Dr. KARL H. POTTER

Professor of Philosophy, Washington University and Chief Editor, Encyclopaedia of Indian Philosophy

We owe a vote of thanks to Professor Pandurangi for providing us with this elegant edition and translation of Madhva's *Viṣṇutattvavinirṇaya*. In many ways this is the quintessential Madhva. It is in this text, more perhaps than in any other, that the great Dvaitin sets forth the central tenets of his faith. Although this is not the first translation of the work—it was translated by S. S. Raghavachar, also from Bangalore, in 1959—it is the more satisfactory of the two. While the earlier translator was satisfied to provide the text and literal translation of each passage, the present treatment is far more generous, giving us bushels of useful comments to assist our understanding. These comments range from philosophical explanations of the relevant views opposing Madhva's—almost invariably Advaitin—to insightful citations of relevant passages from commentators and from scripture. Especially helpful are the rubrics indicating the subject-matter of each section, in effect a Table of Contents, lacking in the previous translation.

Inevitably as time progresses there is a need for new translations of important texts such as this one. English expressions which seemed natural and clear at one time lose their cogency in a later period. Furthermore, there has over the decades, arisen a greater scholarly tolerance for " looser ", i.e., more natural and colloquial, translation. The present rendition provided by Prof. Pandurangi is a fine example of such a style.

The translator is fully conversant with the nuances of the style found in works of this nature and tradition. He has done us a signal service in providing such an illuminating rendition.

Viṣṇutattvavinirṇaya is one of the ten Prakaraṇas i.e., compendiums written by Sri Madhvacharya alias Anandatirtha the founder of the Dvaita School of Vedanta. It is a major Prakaraṇa while the other nine are comparatively small.

Sri Madhvacharya flourished during the thirteenth century. Udupi, now an important town in the Mangalore District of Karnataka, was the centre of his activity. He opposed the Advaita Vedanta of Sri Sankara and wrote Bhashyas on the Upanishads, Brahmasutras and Bhagavadgita. He also wrote a Bhashya on the first forty hymns of the Rigveda, prepared a critical digest of the Mahabharata called Mahabharata Tatparyanirnaya, a work on worship viz. Tantrasara Sangraha, a brief commentary on the Bhagavata, viz. Bhagavata Tatparyanirnaya and a few other works. His Brahmasutraṇuvyakhyana is an exposition of Vedanta Philosophy in detail. It is a dialectical work. It is in verses and contains about two thousand verses. It can be compared with Bhartrihari's Vakyapadiya and Kumarila's Vartika in style though the subject matter is different. He has thirty-seven works to his credit.

Apart from his works propounding Dvaita Vedanta, he toured the whole of India twice and debated with the contemporary scholars on Dvaita-Advaita dialectical issues. He converted many to his faith. King Mahadeva of Yadava dynasty met him and paid his respects. A Court-Scholar of this king, viz. Sobhanabhatta alias Anandabhatta became Sri Madhvacharya's disciple. He was ordained to Sannyasa. He was named as Padmanabhatirtha. He later went to the famous Vijayanagar region

and did the spadework for the establishment of Vijayanagar empire. Another disciple of Sri Madhvacharya, viz. Naraharitirtha was the regent of Kalinga country. Sri Madhvacharya established a Krishna Temple at Udupi and ordained eight Brahmacharins to Sannyasa. The eight Mathas of these still continue as great centres of learning and culture.

All major works of Sri Madhvacharya are commented upon by Sri Jayatīrtha, a successor of Padmanabhatirtha. Among his commentaries Nyāyasudhā, a commentary on Anuvyākhyāna, is his *magnum opus*. He has commented upon the present work Viṣṇutattvavinirṇaya. On his commentary there are a dozen sub-commentaries.

II

Viṣṇutattvavinirṇaya is a neatly planned text. The very benedictory verse gives its plan—

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥
विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात् सज्जनसंविदे ॥

The first adjective in the benedictory verse **सदागमैकविज्ञेय** is elaborated in the first chapter, the second adjective **समतीतक्षराक्षर** in the second chapter, and the adjective **निर्दोषाशेषसद्गुण** is elaborated in the third chapter.

The scope of the sacred literature

The **सदागम**s are: the four Vedas, **महाभारत**, **पञ्चरात्र**, **मूलरामायण** and such of the **पुराण**s that are not in conflict with the teachings of the Vedas etc., mentioned earlier. All other works that follow these also constitute **सदागम**. But works that are opposed to the teachings of these

such as पाशुपतागम etc., are not सदा s. However, even in these works, whatever is in tune with the teachings of the Vedas etc., that is acceptable. This explanation of the scope of सद्दागम brings out two important points :

(i) The scope of the sacred literature is not to be confined to the Vedas only but इतिहास-पुराणs are also to be included in it.

(ii) Every work that goes under the name of आगम is not necessarily a sacred work. Its content has to be examined. If it is not opposed to the teachings of the Vedas etc., sacred works, then only, it is a part of sacred literature. Another point that emerges from this definition of the sacred literature is, the Vedas should be understood in the light of इतिहासपुराण but not in isolation. Veda and Itihasa Purana form a continuous tradition and therefore, these texts have to be interpreted and comprehended in the light of the tradition but not in isolation. इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत् ।

The expression सदागमैकविज्ञेय conveys two points :

(i) Lord Narayana is the chief purport of the sacred literature.

(ii) The sacred literature is the only source to know Lord Narayana. The word एक conveys these two points. This rules out प्रत्यक्ष and अनुमान as the means to know the Supreme God Narayana.

The doctrines of वेदापौरुषेयत्व and स्वतःप्रामाण्य

Vedas constitute the highest sacred literature. This is because, these are अपौरुषेय and स्वतःप्रमाण. Therefore, Viṣṇutattvavinirṇaya takes up these two issues for the discussion in the next section.

*

In Indian Philosophy, वेदापौरुषेयत्व is a very important issue. This issue of वेदापौरुषेयत्व is discussed in जैमिनिसूत्रs of पूर्वमीमांसा in detail and elaborated by सायण in his वेदभाष्यभूमिका. This discussion is confined to only three points viz.—

(1) Whether a composer of the Vedas, if there was any, could be ascertained in a reasonable way and in the absence of such ascertainment is it not reasonable to conclude that there was no such composer ?

(2) If the Vedas were not composed at a given point of time, then, how to account for the references to the names of certain personalities flourished at certain times in tradition and mythology ?

(3) What is the role of the sages who are declared to be the seers of Vedic hymns ? Are they mere seers or are they composers ?

These questions and the answers given to the same do not take us deeper into this problem and do not reveal the deeper insight into the concept of Vedapaurusheyatva. Therefore, to understand the deeper implications of the concept of वेदापौरुषेयत्व the enquiry has to be made differently. The scope of the enquiry of both Purva-mimamsa and Vedanta is not confined to the external world and its categories. The enquiry into the nature and role of moral concepts such as Dharma and Adharma, and the spiritual concepts like self, God etc., is the chief task of these two disciplines. The epistemological means like Pratyaksha, Anumana that are sufficient only to comprehend the external world and its categories do not help to comprehend the moral concepts like Dharma and Adharma and the spiritual concepts like self and God. Instructions

contained in a work composed by a human being cannot also help us in the matter. Such a human being also has to derive his knowledge from some authentic source. He himself cannot claim to be the source of the knowledge of moral and spiritual concepts. These have to be revealed to the morally and spiritually sensitive minds. Such revelation may be embodied in words and also in other ways. The Vedas constitute such revelations of moral and spiritual concepts as embodied in words i.e., Vedic hymns. This is the basis of the concept of अपौरुषेयत्व.

प्रत्यक्षेणानुमित्या वा यस्तु न बुद्ध्यते ।
एतद्विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

नेन्द्रियाणि नानुमानं वेदा हि एव एवं वेदयन्ति तस्मादाहुर्वेदा इति ।

The words i.e., Vedic hymns that embody the revelations of spiritual and moral concepts are naturally not composed by anyone.

In Indian tradition वर्णs are considered as eternal. The words that consist of one or more वर्णs and the sentences that contain one or more words of revealed literature are also eternal. The order in which these occur is also not man-made. These are ever present in God's mind and are revealed to the seers. These are handed over by a long tradition of the teacher and the taught—

नित्याः वेदाः समस्ताश्च शाश्वताः विष्णुबुद्धिगाः ।
सर्गे सर्गे अमुनैवेते उद्गीर्यन्ते तथैव च ॥
तत्क्रमेणैव तैर्वर्णैः तैः स्वरैरेव नान्यथा ।
अतः श्रुतित्वमेतासां श्रुता एव यतोऽखिलैः ॥

In view of this, the objections raised taking the human composition i.e., पौरुषेयवाक्य as a model do not apply to

the revealed literature. The sages referred to as seers of the Vedas are not composers but seers i.e., the recipients of the revelations. Revealed sentences do not need a composer. References made to personalities and events in revealed literature have no temporal restrictions. Therefore, the objections based on these considerations do not hold good in respect of revealed literature which is अपौरुषेय and स्वतःप्रमाण.

The doctrine of प्रामाण्यस्वतस्त्व mentioned in the context of the Vedas has a much wider scope. Not only the knowledge derived from the Vedas is स्वतःप्रमाण but all knowledge derived by flawless means of knowledge is स्वतः-प्रमाण. The knowledge derived by निर्दुष्टेन्द्रिय, निर्दुष्टहेतु, निर्दुष्टपौरुषेयशब्द is also स्वतःप्रमाण. The स्वतःप्रामाण्य of knowledge has to be understood in two ways :

(i) The knowledge to be true or valid does not require any more additional means than its bonafide means. However these bonafide means must be flawless.

(ii) To know the truth or the validity of knowledge no other additional means is required. Sakshin that comprehends knowledge also comprehends its validity. Thus both in उत्पत्ति the origination of knowledge and ज्ञप्ति comprehension of knowledge, no additional factors than the respective bonafide means of knowledge are necessary. This is the implication of the concept of स्वतःप्रामाण्य.

So far as अप्रामाण्य is concerned it arises because of certain defects such as इन्द्रियदोष, हेतुदोष etc. The Sakshin initially does not comprehend अप्रामाण्य. It needs the assistance of परीक्षा. The अप्रामाण्य is detected by sublation, contradiction i.e., बाध, व्यभिचार etc. These indicate अप्रामाण्य. However, अप्रामाण्य is also comprehended by साक्षिन्

only by these indications. It is in this sense that **अप्रामाण्य** is said to be **परतः**. **अपौरुषेयवेद**s being absolutely free from these defects are **प्रमाण**. **प्रत्यक्ष** etc., are **प्रमाण** when these are free from the defects. In any case no additional condition or factor is required to validate knowledge. Therefore, all bonafide knowledge is **स्वतःप्रमाण**.

(i) सर्वेषां ज्ञानानां यथार्थत्वलक्षणं प्रामाण्यं स्वत एव ज्ञानग्राहकेणैव गृह्यते ।

(ii) ज्ञानं साक्षिप्रत्यक्षवेद्यम् । तत्प्रामाण्यमपि साक्षिप्रत्यक्षवेद्यमेव ।

(iii) ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्गः एव । विसंवादलक्षणात् परतः अपवादात् अप्रामाण्यं च गृह्णाति ।

These two doctrines viz. **वेदापौरुषेयत्व** and **प्रामाण्यस्वतस्त्व** are discussed in Viṣṇutattvavinirṇaya to support **सदागमैकविज्ञेयत्व**. If **सदागम** is **प्रमाण**, then only **सदागमैकविज्ञेयत्व** is meaningful. Therefore, its **प्रामाण्य** is explained on the grounds of **अपौरुषेयत्व** and **स्वतः प्रामाण्य**.

The doctrine of सिद्धे व्युत्पत्ति

However, there is one more issue to be tackled in this connection. This issue is the issue of **व्युत्पत्ति** i.e., **शाब्दबोध** or **वाक्यार्थबोध**. Therefore, this issue is next taken for discussion.

According to Mīmāṁsakas the sentences communicate only activity and those that are connected with the activity. Viṣṇu is a **सिद्धवस्तु**. Therefore **सदागम**s that are of the nature of sentences cannot communicate Viṣṇu or Nārāyaṇa. This view is known as **कार्ये व्युत्पत्तिवाद**. This is not tenable. Our day to day experience reveals that even **सिद्धवस्तु**s that are not connected with any activity are communicated by the sentence. Therefore, there is no difficulty in **सदागम**s conveying Viṣṇu.

In this respect the objection raised is

(i) कार्यान्विते एव अर्थे सर्वशब्दानां व्युत्पत्तिदर्शनात् केवलं सिद्धार्थे तदभावात् न सिद्धस्वरूपे विष्णौ वेदस्य प्रतिपादकत्वं संभवति।

The answer given is

(ii) वृद्धव्यवहारदर्शनं विना अङ्गुल्यादिनिर्देशेन शब्दसमुदायस्य कार्यान्वयरहिते एव तस्मिन् अर्थसमुदाये विषयविषयिभावं तावदवगच्छति बालः।

एवं कार्यान्वयं विनापि व्युत्पत्तिदर्शनात् योग्येतरान्विते व्युत्पत्तिरिति सामान्यमेव अङ्गीकार्यम्।

Another point to be noted here is that it is not **कार्यताज्ञान** that is **प्रवर्तक** but it is **इष्टसाधनताज्ञान** that is **प्रवर्तक**. Therefore, it is not correct to complain that **सिद्धवाक्य**s are not **प्रवर्तक** and therefore are not **प्रमाण**.

In this respect also the objection raised is

(i) वाक्यप्रयोगस्य परार्थत्वात् परप्रयोजनाङ्गमेव वाक्यं प्रामाण्यमश्नुते। परप्रयोजनाङ्गं च यत्कार्यपरम्। ततः केवलसिद्धे अर्थे कथं वाक्यस्य प्रामाण्यम्?

The answer given is

(ii) न च कुत्रचित् सिद्धज्ञापनात् अन्यत् वाक्यप्रयोजनं दृष्टम्। वाक्यं हि प्रमाणम्। तच्च प्रमासाधनम्। प्रमा च यथार्थज्ञानम्। अतः तस्य परज्ञापनमेव प्रयोजनम्। न हि अन्यत् प्रयोजनं दृष्टम्। तच्च प्रयोजनं सिद्धविषयस्यापि अस्ति।

(iii) ज्ञात्वैव हि इष्टसाधनतां प्रवर्तते निवर्तते च विपर्ययेण। अतः सिद्ध एव सर्ववाक्यानां प्रामाण्यं सिद्धम्।

After settling these two issues, viz. **सदागम** is **प्रमाण** and **सदागम** is **सिद्धबोधक** the main question whether **विष्णुसर्वोत्तमत्व** and **जीवेश्वरभेद** are conveyed by **सदागम** or **अभेद** is conveyed, is taken up.

The doctrine of भेद

In respect of भेद i.e., difference the following points are discussed in Viṣṇutattvavinirṇaya.

(1) Whether भेदश्रुतिs are merely अनुवादक or प्रमाण ?

(2) Whether the concept of भेद is tenable or not ?

(3) What is the ontological nature of भेद ? Is it धर्मिस्वरूप or धर्मिभिन्न ?

(4) Are the concepts of मिथ्याभेद and औपाधिकभेद tenable ?

(5) Is the very concept of मिथ्या tenable ?

Advaitins argue that since भेद is known by प्रत्यक्ष and अनुमान, भेदश्रुतिs merely state what is already known. Therefore, these are merely अनुवादक but not प्रमाण in respect of भेद. This argument is not acceptable to Dvaita. To know जीवेश्वरभेद one has to know both जीव and ईश्वर. Though the Jīva is known by Pratyakṣa, Īśvara is not known either by Pratyakṣa or by Anumāna. The Anumāna proposed by Nyāyā to establish Īśvara cannot ultimately stand. Therefore, Īśvara is not known. Therefore, the difference between the Jīva and Īśvara is also not known before one comes across the Bhedaśrutis. Therefore, Bhedaśrutis are not anuvādakas but are Pramāṇa.

भेदस्तावत् धर्मिप्रतियोगिप्रतीतिसापेक्षः इति जीवेश्वरप्रतीत्या अवश्यं भाव्यम् । तत्र यद्यपि जीवः साक्षिप्रत्यक्षसिद्धः तथापि न ईश्वरसिद्धिः । तथा च धर्मिप्रतियोगिप्रतीत्यभावात् कथं तदधीना प्रत्यक्षादिना जीवेश्वरभेदसिद्धिः ।

Further, if bheda is established by Pratyakṣa and Anumāna, then, abheda śruti that is opposed to this cannot be Pramāṇa.

प्रत्यक्षानुमानसिद्धत्वे च भेदस्य तद्विरोधादेव अप्रामाण्यं अभेदागमस्य ।

Though ordinarily श्रुति is superior to Pratyakṣa and Anumāna, when these are उपजीव्य to श्रुति, these are superior. A Pramāṇa that provides the subject matter to another Pramāṇa is उपजीव्य for it. In the present context for जीवेश्वराभेदश्रुति the subject matter, viz. जीव and ईश्वर are provided by Pratyakṣa and Anumāna as contended by Advaitin himself. Therefore these are Upajīvya to Abhedaśruti. Hence, Abhedaśruti that is opposed to the bheda established by these cannot be Pramāṇa.

(i) येन भेदवाक्यानामनुवादकत्वमुच्यते तेन अवश्यं भेदस्य प्रत्यक्षानुमानसिद्धत्वं वाच्यम् । असिद्धस्य अनुवदितुमशक्यत्वात् । तथा च भेदग्राहकप्रत्यक्षादिविरोधादेव अप्रामाण्यं अभेदागमस्य अपरिहार्यम् ।

(ii) यद्यपि प्रत्यक्षानुमानाभ्यां आगमस्य प्राबल्यमिति उत्सर्गः । तथापि यत्र प्रत्यक्षानुमानयोः आगमं प्रति उपजीव्यत्वं तत्र तयोरेव ततो बलवत्त्वम् ।

(iii) येन हि यस्य विषयः सिद्ध्यति तत् तस्य उपजीव्यम् । विषयाभावे स्वोदयाभावेन अबोधकत्वलक्षणं अप्रामाण्यं प्राप्नोति ।

(iv) जीवं विषयीकृत्य तस्य ईश्वरेण अभेदः बोधनीयः । तत्र ईश्वरः कार्यत्वाद्यनुमानसिद्धः जीवः प्रत्यक्षसिद्धः इति प्रत्यक्षानुमाने तत्त्वमस्याद्यागमस्य उपजीव्ये ।

Bheda that is established by Pratyakṣa and Anumāna, and also stated in bhedaśrutis establishes its validity more firmly. Therefore, the mention of bheda in bhedaśrutis need not be dubbed as mere anuvāda. बहुप्रमाणसंवादश्च दार्ढ्यहेतुः ।

The next question is whether the very concept of भेद is tenable. Advaitins argue that bheda i.e., difference could be comprehended either as adjective or as substantive but these very positions depend upon the comprehension of difference. Similarly, the difference is comprehended having a reference to Dharmin i.e., that which is differentiated from something and Pratiyogin that from which it is differentiated. But these two positions depend upon the comprehension of difference. Thus, comprehension of difference results in anyonyāśraya i.e., reciprocal dependency. Hence the concept of difference itself is not tenable.

(i) विशेष्यविशेषणतया भेदसिद्धिः। विशेषणविशेष्यभावश्च भेदापेक्षः। धर्मिप्रतियोग्यपेक्षया भेदसिद्धिः। भेदापेक्षं च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्य अयुक्तिः।

This objection raised by Advaitins against the concept of difference does not hold good. The ontological nature of the difference is that it is an internal attribute of the object concerned. It is पदार्थस्वरूप that is to say it is धर्मिस्वरूप. When one observes an object, he observes it as distinct from all others in a general way. Then, he observes it as distinct from this or that object which is referred to in the context. Therefore, there is no question of anyonyāśraya i.e., reciprocal dependency.

न भेदः धर्मिप्रतियोग्युभयधर्मः। किन्तु धर्मिणः धर्मः प्रतियोगिना निरूप्यः। स च भेदः धर्मिणः स्वरूपमेव। तेन धर्मिप्रतीतिरेव भेदप्रतीतिरिति प्रतीतिद्वयाभावात् न अन्योन्याश्रयता।

In case the difference is not considered as an internal attribute of the object, then, when an object is observed its distinction from all other objects would not be observed.

However, our experience is, when we see an object we also realise that it is distinct from all other objects also. Therefore, the difference is an internal attribute of the object concerned i.e., **पदार्थस्वरूप**.

यदि न स्वरूपं भेदः तदा पदार्थे दृष्टे प्रायः सर्वतो वैलक्षण्यं तस्य न ज्ञायेत । सामान्यतः सर्ववैलक्षण्ये ज्ञात एव घटत्वादिज्ञानम् ।

Advaitins, though deny **सत्यभेद**, they accept **मिथ्याभेद** i.e., **व्यावहारिकभेद**. They argue that **भेदः मिथ्या भेदत्वात् चन्द्रभेदवत्**. This is not tenable, because, the very concept of **मिथ्यात्व** is not tenable. The concept of **मिथ्यात्व** is established by Advaitins on the ground '**सत् चेत् न बाध्येत असत् चेत् न प्रतीयेत**'. For instance, **शुक्तिरजत** is not **सत्** because it is sublated later, nor it is **असत्** because, it is experienced, therefore it is **सदसद्विलक्षण**. Similarly the entire **व्यावहारिकप्रपञ्च** is **सदसद्विलक्षण** and so is **व्यावहारिकभेद** also. **मिथ्यात्व** is defined as **सदसद्विलक्षणत्व**.

This contention of Advaita is not tenable, because, **शुक्तिरजत** is **असत्**. It is not **सदसद्विलक्षण**. In the argument advanced by Advaitin to establish **मिथ्यात्व**, the statement '**असत् चेत् न प्रतीयेत**' is not acceptable. According to Dvaita **असत्** is comprehended as **असत्**. Otherwise its denial becomes difficult. Therefore, **शुक्तिरजत** that is comprehended is **असत्**. It is not **असद्विलक्षण** as contended by Advaitin. Hence, the very concept of **सदसद्विलक्षण** i e., **मिथ्या** is not tenable.

न च परमार्थतः भेदाभावः व्यावहारिकः सः अस्तीति वाच्यम् । सदसद्वैलक्षण्ये मानाभावात् । असतः ख्यात्ययोगादिति वदतः ख्यातिः अभूत् न वा । यदि न अभूत् न तत्ख्यातिनिराकरणम् । यद्यभूत् न तथापि । न च शुक्तेः रजतत्वं सदसद्विलक्षणम् । असदेव रजतं प्रत्यभात् इत्यनुभवात् ।

The सत्यत्व of भेद is not only cognised by प्रत्यक्ष and अनुमान but it is affirmed by śruti more than once. 'सत्यं भिदा सत्यं भिदा सत्यं भिदा' is the emphatic statement of śruti. This bheda is five-fold.

जीवेश्वरभिदा चैव जडेश्वरभिदा तथा।
जीवभेदो मिथश्चैव जडजीवभिदा तथा।
मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः ॥

The differences —

(i) Between Jīva and Īśvara
(ii) Between Jada and Īśvara
(iii) Between Jīva and Jīva
(iv) Between Jada and Jīva
(v) Between Jada and Jada

constitute the five-fold differences.

The difference between Jīva and Īśvara continues even after liberation. This is made clear in the following śruti passages.

(i) सोऽश्नुते कामान् सह ब्रह्मणा विपश्चिता ।
(ii) परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते ।
(iii) स तत्र पर्येति जक्षन् क्रीडन् रममाणः ।
(iv) यथोदकं शुद्धे शुद्धमसिक्तं तादृगेव भवति ।
(v) निरञ्जनः परमं साम्यमुपैति ।
(vi) ॐ जगद्व्यापारवर्जम् ॐ ।

From the above exposition of the concept of भेद it is clear that all aspects of the concept of भेद are clearly discussed in Viṣṇutattvavinirṇaya. Anuvyākhyāna discusses these aspects in greater detail. Bhedojjīvana of Sri Vyāsarāja especially discusses this concept. There is no Dvaita work wherein this concept of भेद is not discussed in some context or the other.

Interpretation of अतत् त्वमसि '

The most important item discussed in Viṣṇutattva-vinirṇaya is the interpretation of key śruti passages. This is to show that the entire śruti supports Viṣṇusarvottamatva and Jīveśvarabheda but not Jīvabrahmaikya.

न च अभेदे कश्चिदागमः । सन्ति च भेदे सर्वागमाः ।

This statement is illustrated by showing the correct reading and the interpretation of the passage **'अतत् त्वमसि'**. The nine illustrations given in the context speak of **जीवेश्वरभेद**, not **जीवब्रह्मैक्य**.

(i) न हि शकुनिसूत्रयोः नानावृक्षरसानां नदीसमुद्रयोः जीववृक्षयोः अणिमाधानयोः लवणोदकयोः गान्धारपुरुषयोः अन्नप्राणादिनियामकयोः स्तेनापहार्ययोः ऐक्यम् ।

The context of the teaching of **'अतत् त्वमसि'** is that **श्वेतकेतु** had developed the pride that he knew everything. He was to be told that he did not know the highest entity i.e., the Supreme God as distinct and superior to him. He also did not know that he was under the control of this Supreme God. In this context no useful purpose would be served if he is told that he is identical with the God. This would increase his pride. Therefore, he is told **' अतत् त्वमसि'** you are not the God. You are completely under his control.

सर्वान् वेदानधीत्य महामनाः अनूचानमानी स्तब्ध एयाय इति आत्मनः अन्यं अनूचानत्वादिगुणप्रदं परमविज्ञाय स्तब्धस्य पराधीनत्वज्ञापनेन स्तब्धतां निरस्य तन्निष्ठा हि अत्रोपदिश्यते ।

Therefore, it is **जीवेश्वरभेद** that is intended to be conveyed here.

एकविज्ञानेन सर्वविज्ञान stated in this context does not indicate **उपादानोपादेयभाव** here but is based on **प्राधान्य** and **सादृश्य.** Therefore, this does not convey **जगन्मिथ्यात्व.**

एकविज्ञानेन सर्वविज्ञानं च प्राधान्यात् किञ्चित् सादृश्यात् । न तु तदन्यस्य मिथ्यात्वात् । न हि सत्यज्ञानेन मिथ्याज्ञानं भवति ।

The illustrations of **मृत्पिण्ड, लोहमणि** and **नखनिकृन्तन** indicate **एकविज्ञानेन सर्वविज्ञान** on the ground of **सादृश्य** but not on the ground of **तादात्म्य** or **अभेद.** The **वाचारम्भण** illustration also indicates **प्रधानज्ञानेन अप्रधानज्ञान.** Therefore, these also do not speak of **जीवेश्वरैक्य** and **जगन्मिथ्यात्व.**

Interpretation of अहं ब्रह्मास्मि etc. श्रुति

The śruti passages **'अहं ब्रह्मास्मि' 'योऽसौ सोऽहम्' 'सोऽहमस्मि'** etc., speak about **अन्तर्यामित्व** but not about **ऐक्य** i.e., **अभेद.** In fact **'अहम्' 'त्वम्' 'सः'** etc., are the names of the Supreme God and speak of him.

अहं नामा हरिर्नित्यमहेयत्वात् प्रकीर्तितः ।
त्वं चासौ प्रतियोगित्वात् परोक्षत्वात् स इत्यपि ।
सर्वान्तर्यामिणि हरौ अस्मच्छब्दविभक्तयः ।
युष्मच्छब्दगताश्चैव सर्वाः तच्छब्दगा अपि ।
सर्वशब्दगताश्चैव वचनान्यखिलान्यपि ।
स्वतन्त्रत्वात् प्रवर्तन्ते व्यावृत्तेप्यखिलात् सदा ।

Therefore, these śrutis also do not support **जीवेश्वरैक्य.**

The following śrutis that are supposed to support Abheda also do not support it.

(1) परे अव्यये सर्वे एकीभवन्ति ।

Here **एकीभाव** does not mean **अभेद** but it means **मत्यैक्य** and **स्थानैक्य.**

जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु ।
एकस्थाननिवासो वा व्यक्तिस्थानमपेक्ष्य सः ॥

(2) ब्रह्मविद् ब्रह्मैव भवति ।

He who knows Brahman will attain greatness. This passage does not mean that he will attain identity with Brahman.

(3) The śruti प्रपञ्चो यदि विद्येत etc., does not support जगन्मिथ्यात्व but explains the five-fold differences.

प्रकृष्टः पञ्चविधः भेदः प्रपञ्चः । माया भगवत्प्रज्ञा सैव मानत्राणकर्त्री यस्य तन्मायामात्रम् । परमेश्वरेण ज्ञातत्वात् रक्षितत्वाच्च न द्वैतं भ्रान्तिकल्पितं परमार्थापेक्षया अद्वैतः सर्वस्मादुत्तमः सः एकः एव ।

Thus, in this verse two points are made, viz.

(i) The five-fold difference is real.
(ii) The God is Supreme.

(4) The śruti न प्रेत्य संज्ञास्ति does not mean 'after liberation only निर्विशेषचिन्मात्र remains' but it means the liberated will not have वृत्तिज्ञान and the unliberated will not have the knowledge of the liberated.

(5) The śruti 'न तु तद् द्वितीयमस्ति' does not mean that there is no second entity but it only means that the different forms of the God are not different from each other.

(6) The śruti 'यत्र तु अस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' does not state that 'the liberated will not see, will not hear' etc., and attains निर्विशेषचिन्मात्र state. It is not a statement of the position in the liberated state. But it is प्रसङ्गापादन. That is to say, it points out certain adverse consequences if the liberated state is described as निर्विशेषचिन्मात्र state.

यदि निर्विशेषचैतन्यमात्रमवशिष्यते न किमपि वस्तु इति मतं स्यात् तदा दर्शनघ्राणादिभोगोऽस्य न स्यात्। भवितव्यं च दर्शनादि-भोगेन। अतः निर्विशेषचैतन्यमात्रावस्थानलक्षणः मोक्षः अनुपपन्नः इत्यापादानात्मकः आक्षेपः एव अस्य वाक्यस्यार्थः।

From the above discussion of the correct meaning of śrutis it is clear that no śruti supports **जीवेश्वराभेद** or **जगन्मिथ्यात्व.**

The doctrine of जगत् सत्यत्व

Viṣṇutattvavinirṇaya re-enforces the concept of **जगत्-सत्यत्वं** by quoting a number of Śruti passages :

(i) कविर्मनीषी परिभूः स्वयंभूः।
याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः।

(ii) यच्चिकेत सत्यमित् तन्न मोघम्।

(iii) विश्वं सत्यं मघवाना युवोरिदापश्च न प्रमिनन्ति व्रतं वाम्।

(iv) अनाद्यनन्तं जगदेतदीदृक् प्रवर्तते नात्र विचार्यमस्ति।

The doctrine of विष्णुसर्वोत्तमत्व

The central theme of Viṣṇutattvavinirṇaya is to proclaim the supremacy of lord Viṣṇu. All other issues are only preparatory to the presentation of this final doctrine. This cental doctrine is emphasised more than once in this text. Several śrutis and Itihāsa-Purāṇa passages are quoted to bring home this doctrine. Some of these are :

(1) द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ (गीता)

(2) सर्वोत्कर्षे देवदेवस्य महातात्पर्यं नैव चान्यत्र सत्यम् ।
अवान्तरं तत्परत्वं तदन्यत् सर्वागमानां पुरुषार्थः ततोऽतः ॥
इति पैङ्गीश्रुतिः ।

(3) मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् ।
उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम् । इति महावाराहे ।

(4) ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः ।
लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिः ॥
स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैः गुणैः ।
निस्सीमत्वेन ते सर्वे तद्वशाः सर्वदैव च ॥

(5) एको नारायण आसीत् न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावा पृथिवी ।

(6) नामानि सर्वाणि यमाविशन्ति
तं वै विष्णुं परममुदाहरन्ति ॥
अस्यैव सर्वनामानि व्यतिरिक्तस्य सर्वतः ।
यः स्वतन्त्रः सदैवैकः स विष्णुः परमो मतः ॥

(7) उत्पत्तिस्थितिसंहाराः नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषात् यस्मात् स हरिरेकराट् ॥

(8) अज्ञानां ज्ञानदो विष्णुः ज्ञानिनां मोक्षदश्च सः ।
आनन्ददश्च मुक्तानां स एवैको जनार्दनः ॥

(9) बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव न संशयः ॥

(10) वर्जितः सर्वदोषैः यः गुणसर्वस्वमूर्तिमान् ।
स्वतन्त्रः तद्वशाः सर्वे स विष्णुः परमो मतः ॥

(11) गुणक्रियादयो विष्णोः स्वरूपं नान्यदिष्यते ।
अतो मिथोऽपि भेदो न तेषां कश्चित् कदाचन ॥

(12) नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥

(13) विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः ।
निर्दुःखानन्दभुक् नित्यं तत्समीपे स मोदते ॥

These passages bring out the following special characteristicts of Lord Viṣṇu.

(1) He is superior to both Kṣara and Akṣara. Akṣara refers to Goddess Lakṣmi and Kṣara refers to all other beings. God Viṣṇu is superior to these. He is Puruṣottama the Supreme.

(2) He is conveyed by the entire sacred scriptures. His glory is the chief purport of the scriptures.

(3) At the commencement of the creation, he alone existed and all others were created by him.

(4) All names convey him only.

(5) He is independent, One and Supreme.

(6) He creates, sustains, destroys, regulates, gives knowledge, conceals, binds and liberates. All these flow from the Supreme Lord Hari.

(7) He gives knowledge, liberation and bliss. He binds and he liberates.

(8) He is absolutely free from the drawbacks and inadequacies. He is independent and all others are entirely dependent on him.

(9) All his attributes and actions are not distinct from him.

(10) He cannot be obtained by mere discourses, by mere learning or intellect. Whomsoever the God chooses, he can obtain him. God reveals his nature to him. He

who knows Lord Viṣṇu as possessed of infinite attributes gets rid of the bondage and enjoys the bliss in God's presence.

These are only a few passages that bring out the glory of Lord Viṣṇu. The main features of the Dvaita concept of Viṣṇu the Supreme God are : (i) He is स्वतन्त्र (ii) He is गुणपूर्ण (iii) He is निर्दोष (iv) He is सर्वकर्ता and (v) He is सर्वोत्तम.

These features are amply brought out in Viṣṇutattva vinirṇaya.

॥ श्रीः ॥

श्री आनन्दतीर्थभगवत्पादाचार्यविरचितः

विष्णुतत्वविनिर्णयः

1. सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥

2. विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात् सज्जनसंविदे ॥

परमात्मा सदागमैकविज्ञेयः

3. ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम् ।
मूलरामायणं चैव पुराणं चैतदात्मकम् ॥
ये चानुयायिनस्तेषां सर्वे ते च सदागमाः ।
दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥
ज्ञेय एतैः सदायुक्तैः भक्तिमद्भिः सुनिष्ठितैः ।
न च केवलतर्केण नाक्षजेन न केनचित् ।
केवलागमविज्ञेयो भक्तैरेव न चान्यथा ॥ इति ब्रह्माण्डे ।

4. 'नावेदविन्मनुतेदं बृहन्तं सर्वानुभूमात्मानं साम्पराये'
इति तैत्तिरीयश्रुतिः ।

'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ'
इति कठश्रुतिः ।

'नेन्द्रियाणि नानुमानं वेदाह्येवैनं वेदयन्ति तस्मादाहुः वेदाः'
इति पिप्पलादश्रुतिः ।

न चैतेषां वचनानामेवाप्रामाण्यम् । अपौरुषेयत्वाद् वेदस्य । 'इतिहासपुराणः पञ्चमो वेदानां वेदः' इति तद्गृहीतत्वाच्च ।

वेदाः अपौरुषेयाः

5. न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम्। तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः।

यस्य तौ नाभिमतौ नासौ समयी। समयप्रयोजनाभावात्। न च तेन लोकोपकारः धर्माद्यभावज्ञाने परस्परहिंसादिना अपकारस्यैव प्राप्तेः। न चोपकारेण तस्य प्रयोजनं अदृष्टाभावात्। अतो धर्माद्यभावं वदता स्वसमयस्य आनर्थक्यमंगीकृतमेवेति नासौ समयी।

6. न च पौरुषेयेण वाक्येन तत्सिद्धिः अज्ञानविप्रलम्भयोः प्राप्तेः।

न च तदर्थत्वेन सर्वज्ञः कल्प्येत। अन्यत्र अदृष्टस्य सर्वज्ञत्वस्य कल्पनं तस्य अविप्रलम्भकत्वकल्पनं तस्य तत्कृतत्वकल्पनं चेति कल्पनागौरवप्राप्तेः।

अपौरुषेयवाक्याङ्गीकारे न किञ्चित् कल्प्यम्।

7. अपौरुषेयत्वं च स्वत एव सिद्धं वेदकर्तुः अप्रसिद्धेः। अप्रसिद्धौ च तत्कर्तुः तत्कल्पने कल्पनागौरवम्। अकल्पने च अकर्तृत्वं सिद्धमेव।

न च लौकिकवाक्यवत् सकर्तृकत्वम्। तस्य अकर्तृकत्वप्रसिद्ध्यभावात्।

न च केनचित् वेद इत्युक्तं वेदसमं परम्पराभावात्।

न च स्वयंप्रतिभातवेदैः दृष्टमवेदवाक्यं भवति परम्परासिद्धवेदवाक्यानुसारित्वात् वेदद्रष्टृणामुक्तगुणवत्वाच्च तेषाम्।

उक्तं च ब्रह्माण्डे—

> विंशलक्षणतोऽनूनः तपस्वी बहुवेदवित्।
> वेद इत्येव यं पश्येत् स वेदो ज्ञानदर्शनात्॥ इति।

प्रामाण्यं स्वतः एव

8. प्रामाण्यं च स्वत एव अन्यथा अनवस्थानात्। न चोक्तयुक्त्यधीनत्वं प्रामाण्यस्य। बुद्धिदोषनिरासमात्रकारणत्वात् युक्तीनाम्। अदुष्टबुद्धीनां च स्वत एव सिद्धत्वात् प्रामाण्यस्य।

न चाकांक्षायामेव प्रमाणान्तरापेक्षावत्त्वात् अनवस्थाभाव इति वाच्यम् । आकांक्षाया एव बुद्धिदोषात्मकत्वात् ।

दुष्टबुद्धीनामेव अप्रामाण्यशङ्केति परतः अप्रामाण्यम् ।

प्रामाण्यं च स्वत एव सिद्धम् ।

वर्णाः नित्याः

9. न च उच्चारणकाले एव वर्णानामुत्पत्तिरिति वाच्यम् । तदेवेदं वचनमिति प्रत्यभिज्ञाविरोधात् ।

न च सादृश्यात् प्रत्यभिज्ञा भ्रान्तिरिति वाच्यम् । सोऽयं देवदत्त इत्यादेरपि तथात्वप्राप्तेः ।

सर्वक्षणिकत्वं वदता बौद्धेन सेयं दिगिति प्रत्यभिज्ञायाः भ्रान्तित्वं न वाच्यं पञ्चस्कन्धेभ्यः अन्यत्वात् । न च दिशः भ्रान्तिकल्पिताः विज्ञान-शून्ययोरपि साम्यात् ।

न च आदित्योदयादिनैव दिक्कल्पना, अन्धकारेऽपि दिङ्मात्र-प्रतीतेः । कादाचित्कभ्रान्तिरेव आदित्योदयादिदर्शनान्निवार्यते । सा च विज्ञानशून्ययोरपि भवतीति तेषां मतं वादिविप्रतिपत्तेः । अतो दिशः स्थिरा एवेति सिद्ध्यति शून्यवदेव ।

अतस्तद्वद्वेदस्यापि स्थैर्यं सिद्धं तदेवेदं वाक्यमिति प्रत्यभिज्ञानात् ।

न चानुमानादीनामागमं विना प्रामाण्यं धर्मादिषु । तदगोचरत्वात् ।

अतः अपौरुषेयवाक्येनैव धर्मादिसिद्धेः सर्ववादिनामपि तदङ्गीकार्यम् ।

अप्रामाण्यं परतः

10. तत्प्रामाण्यं च स्वत एव सिद्धम् । अप्रामाण्यस्य च परतस्त्वा-नङ्गीकारे दुष्टेन्द्रियादेरप्यप्रामाण्यहेतुत्वं न स्यात् । तदनङ्गीकारे च अनुभव-विरोधः ।

अतः प्रामाण्यं स्वतः अप्रामाण्यं परतः इति सिद्धम् ।

*

वेदाः नित्याः

11. 'वाचा विरूपनित्यया'

'नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदम्' इति ।

'श्रुतिर्वाव नित्या अनित्या वाव स्मृतयः याश्चान्याः वाचः' ।

इति पैङ्गिश्रुतिः ।

विज्ञेयं परमं ब्रह्म ज्ञापिका परमाश्रुतिः । अनादिनित्या सा तच्च विना तां न स गम्यते ॥' इति कात्यायनश्रुतिः ।

'सहस्रधा महिमानः सहस्रं यावद्ब्रह्मविष्ठितं तावती वाक् ।'

कश्छन्दसां योगमावेद धीरः को धिष्ण्यां प्रतिवाचं पपाद, इत्यादि च ।

12. नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः ।
सर्गे सर्गेऽमुनैवेते उद्गीर्यन्ते तथैव च ।
तत्क्रमेणैव तैर्वर्णैः तैः स्ववैरेव नान्यथा ।
अतः श्रुतित्वमेतासां श्रुता एव यतोऽखिलैः ।
जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः ।
मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः ॥
यतस्ता हरिणा दृष्टाः श्रुता एवापरैर्जनैः ।
श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः ॥
तदुत्पत्तिवचश्चैव भवेद्युक्तिमपेक्ष्य तु ।
चेतनस्य जनैः यद्वदुच्यते सर्वलौकिकैः ॥

पुराणानि अनित्यानि

13. पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु ।
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत् ।
वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्त्यपेक्षया ।
अवान्तराभिमानानां देवानां वा व्यपेक्षया ॥
नानित्यत्वात् कुतस्तेषामनित्यत्वं स्थिरात्मनाम् । इति ब्रह्माण्डे ।

न चानित्यत्वे श्रुतिः वेदः इत्यादि विशेषशब्दः उपपद्यते ।

वेदास्ते नित्यविन्नत्वात् श्रुतयश्चाखिलैः श्रुतेः ।
आम्नायोऽनन्यथापाठादीशबुद्धिस्थिताः सदा ॥ इति महावाराहे ।

न च नित्यत्वं विना वेदानां दर्शनव्यवहारो युज्यते ।

14. न च वर्णपदादीनामनित्यत्वं वक्तुं युक्तम् । सर्वज्ञत्वादीश्वरस्य तद्बुद्धौ सर्वथा प्रतीयमानत्वात् ।

न च घटादिवत् संस्कारमात्रत्वं युक्तम् । प्रत्यभिज्ञाविरोधस्य उक्तत्वात् । पुराणानामपि अन्यथा शब्दरचनमेवानित्यत्वम् ।

अतः आकाशगुणे शब्दे व्यज्यमानाः वर्णादयः तत्क्रमात्मको वेदश्च नित्य एवेति सिद्धम् ।

सिद्धान्विते एव व्युत्पत्तिः

15. न च केवलसिद्धे अर्थे व्युत्पत्त्याभावादप्रामाण्यम् । सिद्धान्वित एव व्युत्पत्तिगृहीतेः । इयं माता अयं पितेत्यादौ अङ्गुलिप्रसारणादिपूर्वकनिर्देशेनैव हि तज्जानाति ।

कार्यान्वित एव व्युत्पत्तिरिति वदतः कार्यस्य कार्यान्वयाभावात् कल्पनागौरवम् ।

इयं माता अयं पिता सुरूपोऽसीत्यादौ सिद्धमात्रज्ञापनेन पर्यवसितत्वाद् वाक्यस्य । तस्य तत्र प्रामाण्यानुभवाच्च ।

न च कुत्रचित् सिद्धज्ञापनाद् अन्यत् वाक्यस्य प्रयोजनम् ।

16. ज्ञात्वैव हि इष्टसाधनतां प्रवर्तते च निवर्तते च विपर्ययेण । अतः सिद्ध एव सर्ववाक्यानां प्रामाण्यं सिद्धम् । प्रसिद्धं च व्याकरणनिरुक्तादीनां सिद्धमात्रे प्रामाण्यं सर्ववादिनाम् । तदनङ्गीकारे च सर्वशाब्दव्यवहारासिद्धिः ।

उक्तं च नारदीये—

> सर्वज्ञं सर्वकर्तारं नारायणमनामयम् ।
> सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि ।
> सर्वेषामपि वेदानामितिहासपुराणयोः ।
> प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यते ॥

जीवेश्वराभेदे आगमस्य न तात्पर्यम्, भेदवाक्यानां न अनुवादकत्वम्

17. न च जीवेश्वराभेद एव तात्पर्यमागमस्य तत्र प्रमाणाभावात् ।

न च जीवेश्वरभेदः सिद्धः इत्यनुवादकत्वं भेदवाक्यानाम् । आगमं विना ईश्वरस्यैव असिद्धेः ।

न च अनुमानात् तत्सिद्धिः विपर्ययेणापि अनुमातुं शक्यत्वात् ।

विमतं सकर्तृकं कार्यत्वाद् घटवत् इत्युक्ते विमतं विकर्तृकं अस्मत् संमतकर्तृरहितत्वात् आत्मवत् इत्यनुमानविरोधात् । अकार्यत्वमुपाधिरित्युक्ते शरीरिजन्यत्वमितरत्रापि उपाधिः इत्युत्तरम् ।

18. प्रत्यक्षानुमानसिद्धत्वे च भेदस्य तद्विरोधादेव अप्रामाण्यमभेदागमस्य । तेन अभेदागमस्य प्रामाण्याभावे नानुवादकत्वं भेदवाक्यानाम् । नहि बलवतः अनुवादकत्वं दार्ढ्यहेतुत्वात् ।

प्रत्यक्षादेः आगमस्य प्राबल्येऽपि न उपजीव्यप्रमाणविरोधे प्रामाण्यम् । विषयाभावे सर्वस्यैव अप्रामाण्यापत्तेः ।

तेनैव हि अनुमानादिना आगमस्य विषयः सिद्ध्यति तत्पक्षेऽपि ।

अनुमानेन हि अनुवादित्वपक्षे ईश्वरः बोद्धव्यः प्रत्यक्षेण च आगमः । अतः तयोः विरोधे प्रामाण्यं न स्यात् । अनुमानसिद्धेश्वराच्च भेदः अनुभवतः सिद्धः जीवस्य असर्वकर्तृत्वेन अनुभवात् ।

19. न च अनुभवविरोधे आगमस्य प्रामाण्यम् । आगमप्रामाण्यानुभवस्यापि अप्रामाण्यापत्तेः ।

बहुप्रमाणसंवादश्च दाढर्च्येहेतुरेव । बहूनां वचने तस्यैव दर्शने दाढर्च्यस्यैव दृष्टेः ।

सर्वाविवादस्थले एव कथंचिदनुवादकत्वम् । न चात्र सर्वाविवादः एकत्ववादिनामेव विवाददर्शनात् ।

बहुप्रमाणविरोधे च एकस्य अप्रामाण्यं दृष्टं शुक्तिरजतादौ । न च दोषजन्यत्वादेव दुर्बलत्वमिति विरोधः । बहुप्रमाणविरुद्धानां दोषजन्यत्वनियमात् ।

प्रमाणत्रयनिरूपणम्

20. अदुष्टमिन्द्रियं त्वक्षं तर्कोऽदुष्टस्तथानुगा ।
आगमोऽदुष्टवाक्यं च स्वदृक्चानुभवः स्मृतः ॥
बलवत्प्रमाणतश्चैव ज्ञेया दोषाः न चान्यथा ।
द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ॥
तयोः स्वभावो बलवानुपजीव्यादिकश्च सः ।
याथार्थ्यमेव प्रामाण्यं तन्मुख्यं ज्ञानशब्दयोः ॥
ज्ञानं च द्विविधं बाह्यं तथानुभवात्मकम् ।
बल्येवानुभवस्तत्र निर्दोषं त्वक्षजादिकम् ॥
अनुप्रमाणतां याति तथाक्षादित्रयं ततः ।
प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम् ।
उपजीव्यविरोधे च न प्रामाण्यममुष्य च ॥

परार्थानुमाने पञ्चावयवनियमो नास्ति

21. यामाहुरनुमां केचित् त्रियाद्यवयवात्मिकाम् ।
सा व्यर्था नोपपत्त्या हि विना सापि प्रमाणताम् ॥

यात्यतो युक्तिरेवैका प्रमाणमनुमात्मकम् ।
युक्तिः प्रतिज्ञारूपा च हेतुदृष्टान्तरूपिका ॥

तथोपनयरूपा च परा निगमनात्मिका ।
पृथक् पृथक् प्रमाणत्वं याति युक्तितयैव तु ।
प्रतिज्ञा हेतुगर्भैव पृथक् प्रामाण्यमेष्यति ॥

सिद्धत्वेन प्रतिज्ञायाः हेतुर्मानं पृथग् भवेत् ।
प्रतिज्ञावयवत्वात्तु स्वातन्त्र्येणैव मानताम् ॥

दृष्टान्तो यात्युपनयो व्याप्तिमाश्रित्य केवलम् ।
व्याप्तिस्तु केवलाऽपि स्यात् प्रमाणं नियमाश्रयात् ॥

तथा निगमनं चोपसंहारैकस्वभावतः ।
प्रामाण्यं यात्यनुभवो ज्ञापयत्युपपत्तिताम् ॥

उपपत्तिदोषाः

22. विरोधश्च तथाधिक्यं न्यूनताऽसंगतिस्तथा ।
उपपत्तिदोषाः विज्ञेयाः विरोधश्च स्वतोऽन्यतः ॥

जनकस्यात्ययो जातिः स्वस्य वाऽन्यस्य वा भवेत् ।
जनकं प्रमाणमुद्दिष्टं स्वस्यार्थस्य प्रकाशनात् ॥

निग्रहाः एत एव स्युः संवादानुक्तिसंयुताः ॥

अर्थापत्तिः उपमा च अनुमाभेद एव

अर्थतः प्राप्तिरेवार्थापत्तिरित्यभिधीयते ।
दृष्ट्वा सदृशमेवान्यं पूर्वदृष्टे तु वस्तुनि ॥

एतत्सदृशताज्ञानमुपमानं प्रकीर्तितम् ।
अभावस्य परिज्ञानं द्विविधं समुदाहृतम् ॥
एकं तत्रानुभवतः योग्यस्यानुपलब्धितः ।
द्वितीयमपि विज्ञेयं सुखाद्ये च घटादिकं ॥

एकं प्रत्यक्षरूपं स्यात् द्वितीयमनुमात्मकम् ।
क्वचिद् घटाद्यभावोऽपि प्रत्यक्षेणावगम्यते ॥

झटित्येव परिज्ञानात् नलिंगोद्भवता मता ।
अर्थापत्तिश्चोपमा च ह्यनुमाभेद एव तु ।
आगमो द्विविधो ज्ञेयो नित्योऽनित्यस्तथैव च ॥

प्रत्यक्षस्य प्रकाराः

23. प्रत्यक्षं त्रिविधं ज्ञेयं ऐश्वरं यौगिकं तथा ।
अयौगिकं चेति तथा सर्वमक्षात्मकं मतम् ॥

अक्षाणि च स्वरूपाणि नित्यज्ञानात्मकानि च ।
विष्णोः श्रियः तथैवोक्तान्यन्येषां द्विविधानि तु ॥

स्वरूपाणि च भिन्नानि भिन्नानि त्रिविधानि च ।
देवासुराणि मध्यानीत्येतत् प्रत्यक्षमीरितम् ॥

विषयान् प्रति स्थितं हि अक्षं प्रत्यक्षमिति कीर्तितम् ।
अक्षयं पुरुषस्याक्षं स्वरूपे मुख्यमेव तु ॥

उपचारस्तदन्यत्र सृष्टावुपचयो यतः ।
उपपत्तिस्वरूपत्वादनुमा सम्भवादिकम् ॥

प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणताम् ।
याति नैवान्यथा तस्य नियतत्वं क्वचिद् भवेत् ॥

इति ब्रह्मतर्के ।

भेदवाक्यानामेव प्राबल्यम्

24. अत्र चोपजीव्यत्वेन प्रमाणप्राबल्यात् भेद एव तात्पर्यं युक्तम् । कथञ्च अनुवादकत्वं भेदस्य प्रमाणेन असिद्धौ । सिद्धौ च कथं अभेद-वाक्यस्य अबाधः । न च अप्रमाणसिद्धेन अनुवादकत्वं प्रमाणस्य भवति । दुर्बलत्वे च भेदप्रमाणस्य आभासत्वात् न भेदवाक्यानामनुवादित्वम् । अतश्च भेदवाक्यानामेव प्राबल्यम् ॥

25. सर्वप्रमाणविरुद्धवचनानामेव प्राबल्याङ्गीकारे 'इदं वा अग्रे नैव किञ्चन आसीत् असतः सदजायत' इत्यादीनामेव अविचारेण प्रतीयमानस्य अर्थस्य सर्वप्रमाणविरुद्धत्वात् तत्र सर्वागमानां महातात्पर्यं प्रसज्येत ।

न च तत्र युक्तिविरोधः इति वाच्यम् । तस्मिन् पक्षे युक्तिविरुद्धत्वेन अननुवादित्वमिति गुण एव स्यात् । युक्तिसिद्धत्वे हि अनुवादित्वं स्यात् । अतः प्रमाणसिद्धत्वे तदपलापायुक्तेः अप्रमाणसिद्धत्वे च भेदप्रमाणस्य अनुवादित्वाभावाच्च । न भेदवाक्यानां दौर्बल्यम् ।

26. न च प्रमाणबहुत्वे दौर्बल्यम् । दार्ढ्यमेव हि बहुवाक्यसंवादे दृष्टम् । तथा सति अभ्यासादेः अप्रामाण्यहेतुत्वं स्यात् । अभ्यासस्य च तात्पर्यलिङ्गत्वं सर्वेषां सिद्धम् । तदनङ्गीकारे तत्पक्षेपि नवकृत्वः तत्त्वमसि इत्यभ्यासस्य अनुवादकत्वेन अप्रामाण्यं स्यात् ।

प्रथमवाक्येनैव यस्य असिद्धं तदर्थमपरमित्युक्ते प्रत्यक्षादिना भेदः येन अनिश्चितः तदर्थमपरं वाक्यमित्युत्तरम् । तस्मात् बहुप्रमाणसंवादित्वे प्राबल्यमेव ।

अतः सर्वप्रमाणविरुद्धत्वात् न अभेदे तात्पर्यं वाक्यस्य किन्तु विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम् ।

विष्णुसर्वोत्तमत्वे एव आगमानां तात्पर्यम्

27. तथा चोक्तं भगवता—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।
यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ।
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥ इति ।

सर्वोत्कर्षे देवदेवस्य विष्णोः महातात्पर्यं नैव चान्यत्र सत्यम् ।
अवान्तरं तत्परत्वं तदन्यत् सर्वागमानां पुरुषार्थस्ततोऽत ॥
इति पैङ्गिश्रुतिः ॥

मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् ।
उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम् ॥ इति महावराहे ।

विष्णुप्रसादेनैव मोक्षः

28. युक्तश्च विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम् । मोक्षो हि सर्वपुरुषार्थोत्तमः ।

धर्मार्थकामाः सर्वेऽपि न नित्याः मोक्ष एव हि ।
नित्यस्तस्मात् तदर्थाय यतेत मतिमान् नरः ॥
इति भाल्लवेयश्रुतिः ॥

अनित्यत्वात् सदुःखत्वात् न धर्माद्याः परं सुखम् ।
मोक्ष एव परानन्दः संसारे परिवर्तताम् ॥ इति भारते ।

मोक्षश्च विष्णुप्रसादेन विना न लभ्यते ।
यस्य प्रसादात् परमार्तिरूपात् अस्मात् संसारात् मुच्यते नापरेण ।
नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात् ॥
इति नारायणश्रुतिः ।

नायमात्मा प्रवचनेन लभ्यः न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥
इति कठश्रुतिः ।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसाम् ॥

इति भगवद्वचनम् ।

29. उत्पत्तिस्थितिसंहाराः नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषात् यस्मात् स हरिरेकराट् ॥ इति स्कान्दे ।

अज्ञानां ज्ञानदो विष्णुः ज्ञानिनां मोक्षदश्च सः ।
आनन्ददश्च मुक्तानां स एवैको जनार्दनः ॥ इति च ।

बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव न संशयः ॥ इति च ।

विष्णोः गुणोत्कर्षे एव सर्वश्रुतिस्मृतीनां महातात्पर्यम्

प्रीतिश्च गुणोत्कर्षज्ञानादेव विशेषतः दृष्टा न अभेदज्ञानात् । अभेदज्ञानादप्रीतिरेव उत्तमानां भवति । घातयन्ति हि राजानः राजा अहमिति वदन्तम् । ददति च सर्वमभिप्रेतं गुणोत्कर्षं वदतः ।

न तादृशी प्रीतिरीड्यस्य विष्णोः । गुणोत्कर्षज्ञातरि यादृशी स्यात् ॥
तत्प्रीणनात् मोक्षमाप्नोति सर्वः । ततो वेदाः तत्पराः सर्व एव ॥

इति सौपर्णश्रुतिः ।

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मां सर्वभावेन भारत ॥

इति गुणोत्कर्षज्ञानादेव परमा प्रीतिः भगवता स्वयमेव अभिहिता । अतः गुणोत्कर्षे एव सर्वश्रुतिस्मृतीनां महातात्पर्यम् ।

न च अभेदे तात्पर्यमित्यत्र किञ्चित् मानम् ।

भेदस्य धर्मिस्वरूपत्वम्

30. न च विशेष्यविशेषणतया भेदसिद्धिः । विशेषणविशेष्यभावश्च भेदापेक्षः । धर्मिप्रतियोग्यपेक्षया भेदसिद्धिः । भेदापेक्षं च धर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्यायुक्तिः ।

पदार्थस्वरूपत्वात् भेदस्य। न च धर्मिप्रतियोग्यपेक्षया भेदस्य अस्वरूपत्वं ऐक्यवत् स्वरूपस्यैव तथात्वात्। स्वरूपसिद्धावपि तदसिद्धिः जीवेश्वरैक्यं वदतः सिद्धैव।

भेदस्तु स्वरूपदर्शन एव सिद्धः। प्रायः सर्वतो विलक्षणं हि पदार्थ-स्वरूपं दृश्यते। अस्य भेदः इति तु पदार्थस्य स्वरूपमितिवत्॥

31. यदि न स्वरूपं भेदः तदा पदार्थे दृष्टे प्रायः सर्वतो वैलक्षण्यं तस्य न ज्ञायेत।

आज्ञाते वैलक्षण्ये आत्मनि घटः इत्यपि संशयः स्यात्। न हि कश्चित् तथा संशयं करोति।

ज्ञात्वैव प्रायः सर्वतो वैलक्षण्यं कस्मिंश्चिदेव सदृशे संशयं करोति। न हि आत्मनि अहं देवदत्तो न वा इति कश्चित् संशयो भवति।

सामान्यतः सर्ववैलक्षण्ये ज्ञाते एव घटत्वादिज्ञानम्। अतः न अन्योन्याश्रयता।

32. न च युगपत् ज्ञानानुत्पत्तिः दोषः। यथा युगपदेव दीपसहस्र-दर्शने सामान्यतः सर्वे ज्ञायन्ते एव तथा स्यात्।

एकस्मिन्नेव वस्तुनि विशेषः तैरपि अंगीकृत एव। नेति नेति इत्यत्र सर्ववैलक्षण्याङ्गीकारात्। विशेषानङ्गीकारे च पुनरुक्तेः।

न च घटाद् वैलक्षण्यमेव पटाद् वैलक्षण्यं अनुभवविरोधात्। तस्माद् भेददर्शनं युक्तमेव।

प्रमाणदृष्टपदार्थानां मिथ्यात्वकल्पनं न युक्तम्

33. यच्च प्रमाणदृष्टानामपि पदार्थानां मिथ्यात्वकल्पनं तच्च प्रमाण-विरुद्धत्वादेव प्रकाशतस्करत्वम्।

नहि प्रमाणदृष्टस्य तर्कबाध्यत्वं प्रत्यक्षादिविरुद्धानां तर्काभासत्व-नियमात्।

शुक्त्यादेः रजतत्वादिप्रतीतेरपि बलवत्प्रत्यक्षविरुद्धत्वादेव भ्रमत्वं न तर्कमात्रात् ।

तर्कमात्रेण प्रत्यक्षबाधने भूतचतुष्टयस्य अबादेः पृथिवीत्वादृष्टेः पृथिव्या अपि पृथिवीत्वं न स्यात् । अतः न तर्कमात्रतः एव दृष्टस्य भ्रान्तित्वं कल्प्यम । अतः सर्वभेदनिरासकतर्कस्य सर्वश्रुतिस्मृतिप्रत्यक्षानुमानविरुद्धत्वात् नितरां आभासत्वम् ।

सदसद्विलक्षणे प्रमाणाभावः

34. न च परमार्थतः भेदाभावः व्यावहारिकः सः अस्तीति वाच्यम् । सदसद्वैलक्षण्ये प्रमाणभावात् ।

असतः ख्यात्ययोगादिति वदतः ख्यातिः अभूत् न वा । यदि न अभूत् न तत्ख्यातिनिराकरणम् । यद्यभूत् न तथापि । न च असतः वैलक्षण्यं तत्प्रतीतिं विना ज्ञायते ।

न च शुक्तेः रजतत्वं सदसद्विलक्षणम् । असदेव रजतं प्रत्यभात् इत्यनुभवात् । न च प्रतीतत्वादसत्त्वाभावः । असतः सत्त्वप्रतीतिः सतः असत्त्वप्रतीतिरिति अन्थाप्रतीतेरेव भ्रान्तित्वात् ।

35. न च असतः भ्रान्तावपि प्रतीतिः नास्तीति वाच्यम् । अनिर्वचनीयपरमार्थत्वस्य असतः एव दृष्ट्यङ्गीकारात् न च तदपि अनिर्वाच्यं अनवस्थितेः । प्रथमानिर्वचनोयासिद्ध्या सर्वानिर्वचनीयासिद्धिरिति मूलक्षतिः । अनिर्वचनीयत्वे रजतस्य अनिर्वचनीयमिदं रजतमिति बाधकज्ञानमुत्पद्येत ।

36. मिथ्याशब्दस्तु अभाववाची । न च सदसद्वैलक्षण्यमस्तीत्यत्र किञ्चिन्मानम् । अनुभवविरोधश्च तत्पक्षे । सदसतोः द्वयोरेव अनुभूयमानत्वात् । अतः अनिर्वचनोयाभावात् असतः प्रतीत्यनङ्गीकारात् प्रतीयमानत्वाच्च भेदस्य सत्त्वप्राप्तेः न अद्वितोयत्वं युज्यते ।

जीवपरमात्मैक्ये श्रुतीनां तात्पर्यं न युज्यते

37. कथञ्च श्रुतिसिद्धः जीवपरमात्मभेदः निराक्रियते । मिथ्यावादित्वे च श्रुतेः कथं ऐक्यस्य सत्यत्वम् । कथञ्चैवं वादिनां वेदवादित्वम् ।

वेदस्य मिथ्यात्वाङ्गीकारादेव हि अवेदवादित्वं बौद्धादीनामपि ।

अतः विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम् ।

कथञ्च जीवपरमात्मैक्ये सर्वश्रुतीनां तात्पर्यं युज्यते । सर्वप्रमाण-विरुद्धत्वात् ।

तथा हि अनुभवविरोधः । न हि अहं सर्वज्ञः सर्वेश्वरः निर्दुःखः निर्दोषः इति कस्यचित् अनुभवः । अस्ति च तद्विपर्ययेण अनुभवः । न च मिथ्यानुभवः अयम् । तद्विपरीतप्रमाणाभावात् ।

38. न च अभेदे कश्चिदागमः । सन्ति च भेदे सर्वागमाः ।

अतत् त्वमसीति नवकृत्वोपदेशः

तथाहि 'अतत् त्वं असि' इति नवकृत्वोपदेशः सदृष्टान्तकः । न चायं अभेदोपदेशः ।

शकुनिसूत्रदृष्टान्तः

स यथा शकुनिः सूत्रेण प्रबद्धः दिशं दिशं पतित्वा अन्यत्र आयतनं अलब्ध्वा बन्धनमेव उपाश्रयते । सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ १ ॥

मधुमक्षिकादृष्टान्तः

39. यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसानां समवहारमेकतां गमयन्ति ते यथा तत्र न विवेकं लभन्ते अमुष्याहं वृक्षस्य रसः अस्मि अमुष्याहं वृक्षस्य रसः अस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पत्स्यामह इति । त इह व्याघ्रो

वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद् भवन्ति तत्तदा भवन्ति ॥ २ ॥

नदीसमुद्रदृष्टान्तः

इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते पश्चात् प्रतीच्यः ताः समुद्रात् समुद्रमेव अपियन्ति । सः समुद्र एव भवति । ता यथा तत्र न विदुः इयमहमस्मि इयमहमस्मीति । एवमेव खलु सोम्येमाः सर्वाः प्रजाः सतः आगम्य न विदुः सत आगच्छामह इति । त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद् भवन्ति तत्तदा भवन्ति ॥ ३ ॥

वृक्षदृष्टान्तः

40. स एष जीवेन आत्मना अनुप्रभूतः पेपीयमानः मोदमानः तिष्ठति । यस्य यदेकां शाखां जीवो जहाति अथ सा शुष्यति ॥ ४ ॥

न्यग्रोधफलदृष्टान्तः

न्यग्रोधफलमत आहरेति इदं भगव इति भिन्दीति भिन्नं भगव इति किमत्र पश्यसीति अण्व इव इमा धाना भगव इति आसां अङ्ग एकां भिन्दीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति । तं होवाच यं वै सोम्य एतमणिमानं न निभालयसे अस्य सोम्य एषः अणिम्नः एवं महान् न्यग्रोधः तिष्ठति ॥ ५ ॥

लवणोदकदृष्टान्तः

41. लवणमेतदुदके अवधाय मा प्रातरुपसीदथा इति तद्ध तथा चकार तं होवाच यद्दोषा लवणमेतदुदकेऽवधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद यथा विलीनमेव अङ्ग अस्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमिति अन्त्यादाचामेति कथमिति लवणमिति अभिप्रास्यैतदथ मा उपसीदथा इति तद्ध तथा चकार तत् शश्वत् वर्तते । तं होवाच अत्र वाव सत् सोम्य न निभालयसे अत्रैव किलेति ॥ ६ ॥

गान्धारपुरुष-आसन्नमरणस्तेन-दृष्टान्ताः

42. यथा सोम्य पुरुषं गन्धारेभ्यः अभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् ॥ ७ ॥

अथ यदास्य वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावन्न विजानाति ॥ ८ ॥

43. पुरुषं सोम्योत हस्तगृहीतमानयन्ति अपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति । स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमभिसन्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यते अथ हन्यते अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते । स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यते अथ मुच्यते ॥ ९ ॥

स्थाननवकेऽपि भेदे एव दृष्टान्ताः

44. एवमेव खलु सोम्य आचार्यवान् पुरुषो वेदेति स्थाननवकेऽपि भेद एव दृष्टान्ताभिधानात् ।

नहि शकुनिसूत्रयोः नानावृक्षरसानां नदीसमुद्रयोः जीववृक्षयोः अणिमाधानयोः लवणोदकयोः गन्धारपुरुषयोः अज्ञप्राणादिनियामकयोः स्तेनापहार्ययोः ऐक्यम् ।

सति सम्पद्य न विदुः सति सम्पत्स्यामह इति, त इह व्याघ्रो वा सिंहो वेति, सत आगम्य न विदुः सतः आगच्छामह इति, त इह व्याघ्रो वा सिंहो वेति भेदापरिज्ञानेन अनर्थवचनाच्च ।

45. नहि गृहादागतस्य गृहे प्रविष्टस्य तदैक्यम् । ताः समुद्रात् समुद्रमेवापियन्ति स समुद्र एव भवति इत्यत्रापि भेद एवोच्यते । अन्यथा ताः समुद्र एव भवन्तीति व्यपदेशः स्यात् । अतः नद्यः समुद्रादागच्छन्ति तं प्रविशन्ति च समुद्रस्तु स एव नैतासां समुद्रत्वं भवतीत्यर्थः ।

न हि भिन्नानां नदीजलपरमाणूनां समुद्राणुभिः ऐक्यं युज्यते। तथा सति महाजनसमितौ प्रविष्टानां द्वित्राणां तदैक्यं स्यात्। न च तद्युज्यते भेदेन अनुभवात्।

'स्वम्' 'अपीतः' शब्दयोः अर्थः

46. स्वं हि अपीतो भवतीत्यत्रापि स्व इति परमात्मनः अभिधानम्। 'स्वात्मना चोत्तरयोः' इति सूत्रात्—

स्वातन्त्र्यात् स्व हि प्रोक्तः आत्मायं चाततत्वतः।
ब्रह्मायं गुणपूर्णत्वात् भगवान् विष्णुरव्ययः॥

इति परमोपनिषदि।

अपीत इत्यपि प्रवेशमात्रं स्वमिति द्वितीयानिर्देशात्। एकीभावविवक्षायां स्वेनेति निर्देशः स्यात्।

स्वं कुलायं यथापीतः पक्षी स्यादेवमीश्वरम्।
अप्येति जीवः प्रस्वापे मुक्तौ चान्योऽपि सन् सदा॥ इति च।

'मनः' 'प्राणः' शब्दयोः अर्थः

47. एवमेव खलु सोम्य एतन्मनः दिशं दिशं पतित्वा अन्यत्रायतनमलब्ध्वा प्राणमेव उपाश्रयत इत्यत्रापि मन इति जीवः प्राणः इति परमात्मा। यत्रायं पुरुषः स्वपिति नाम इति तयोरेव प्रस्तुतत्वात्।

मननान्मन उद्दिष्टः पुद्गलो निरयं गिरन्।
कर्मानुशयनाच्चैव संसार्यनुशयी स्मृतः॥ इति च।

प्राणः प्रणयनादेव साधुत्वात् सन् हरिः स्मृतः। इति च।

सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः इत्यत्रापि भेदः एव प्रतीयते।

स्रष्टृत्वादाश्रयत्वाच्च मुक्तानां च प्रति प्रति।
स्थापनाच्च विभुः विष्णुः अन्यः संसारिणः मतः॥ इति च।

जीवशब्देन परमात्मा अभिहितः

48. अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणीति स एष जीवेनात्मना अनुप्रभूतः पेपीयमानः मोदमानः तिष्ठति इत्यत्रापि जीवशब्देन परमात्मा अभिहितः। जीव इति भगवतः अनिरुद्धस्य आख्या इति श्रुतेः।

विष्णुः जीव इति प्रोक्तः सततं प्राणधारणात्।
स प्रविश्य शरीरं च स्थावरं जङ्गमं तथा ॥
महाभूतानि च विभुः त्रिवृत्करणपूर्वकम्।
संसारिणं भ्रामयति सदैव अन्यत्वलक्षणम् ॥
तेनायं मोदते नित्यं वृक्षावस्थां गतोऽपि सन्। इति च।

तत्तेज ऐक्षत ता आप ऐक्षन्त इमास्तिस्रो देवता इति पूर्वमेव चेतनत्वसिद्धेः अनेन जीवेनात्मनेति संसारिणः पुनः प्रवेशः न युक्तः। अतस्तत्र जीवशब्देन परमात्मैवाभिहितः।

जीवेनात्मनानुप्रभूतः पेपीयमानः मोदमानः तिष्ठतीत्यत्रापि जीवशब्दोदितः पर एव। पेपीयमानः मोदमानस्तु संसारी। नहि चेतनादन्यस्य मोदभोगादिकं युज्यते।

सुखस्याप्यायतनं शरीरं दुःखस्याप्यायतनं शरीरम्।
अचेतनं प्राकृतमेतदाहुः भोक्ता तयोः चेतनकः शरीरी ॥
इति भारते।

जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते इत्यत्रापि जीवशब्दः परे। नहि संसारिणः मुख्यतः प्राणधारकत्वं युज्यते।

ब्रह्मणा त्यक्तदेहस्तु मृत इत्युच्यते नरः।

'अण्व्यः' 'अणिमा' शब्दयोः अर्थः

49. यं वै सोम्य एतमणिमानं न निभालयसे अस्य सोम्यैषोऽणिम्नः एवं महान् न्यग्रोधः तिष्ठति इत्यत्रापि अणिमशब्देन पर एवाभिहितः।

*

स एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा अतत् त्वमसि श्वेतकेतो इत्युक्तत्वाच्च ।

धानासु तु अण्व इव इमाः धानाः इति स्त्रीलिङ्गप्रयोगात् इवशब्द-प्रयोगाच्च न अणिमत्वम् । न च ता न निभालयसे ।

आत्मशब्दः परमात्मन्येव मुख्यः

'ऐतदात्म्यमित्येतदीयम । स आत्मेत्यात्मशब्दस्तु पर एव । 'द्युभ्वाद्यायतनं स्वशब्दात्', 'नानुमानमतच्छब्दात्', 'प्राणभृच्च' इत्यत्र तमेवैकं जानथ आत्मानमिति स्वशब्दपर्यायात्मशब्दात् न प्रकृतिजीवावभिधीयेते किन्तु पर एवेति भगवता व्यासेन अभिहितम् । अतः आत्मशब्दः तस्मिन्नेव मुख्यः ।

आततत्वाच्च मातृत्वादात्मेति परमो हरिः ।
आत्माभासः तदन्ये ये न ह्येतेषां तताः गुणाः ॥

इति परमोपनिषदि ।

50. तेजः परस्यां देवतायां तावन्न जानाति इत्यत्र च यदा अस्य प्राणादीन् परः ग्रसति तदा न जानाति यदा ददाति तदा जानातीति तद्वशत्वमेवोक्तम् ।

यदा प्राणान् ददातीशः तदा चेतनकोऽखिलम् ।
जानाति ग्रस्तकरणः तेन वेत्ति न किञ्चन ॥ इति च ।

अपहार्षीत् स्तेयमकार्षीत् इत्यत्र च अन्याभिमतस्यैव वस्तुनः अपहार्यत्वात् भेद एवायं दृष्टान्तः । अन्यं सन्तं परमात्मानं स्वयमिति मन्यमानः स्तेन एवेति । न हि स्वकीयं परित्यजन् स्तेनः भवति ।

ऐकात्म्यनिन्दा

ऐकात्म्यं नाम तदिदं केचिद् ब्रूयुरनैपुणाः ।
शास्त्रतत्त्वमविज्ञाय तथा वादबलाज्जनाः ॥

कामक्रोधाभिभूतत्वादहंकारवशं गताः ।
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः ॥
ब्रह्मस्तेना निरानन्दा अपक्वमनसोऽशिवाः ।
वैगुण्यमेव पश्यन्ति न गुणानि नियुञ्जते ॥
तेषां तमः शरीराणां तम एव परायणम् ।
यतः स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः ॥
कथमस्मि स इत्येव सम्बन्धः स्यादसंहित । इति मोक्षधर्मे ।

जीवेश्वरभेदे प्रमाणवचनानि

51. यथा पक्षी च सूत्रं च नानावृक्षरसा यथा ।
यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा ।
यथा चोरापहार्यौ च यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ ।
तथापि सूक्ष्मरूपत्वात् न जीवात् परमो हरिः ॥
भेदेन मन्ददृष्टीनां दृश्यते प्रेरकोऽपि सन् ।
वैलक्षण्यं तयोः ज्ञात्वा मुच्यते बद्ध्यतेऽन्यथा ॥

इति च परमोपनिषदि ।

प्रेरकः सर्वजीवानां प्राणधीचोदिता च सः ।
विष्णुः संसारिणः अन्यः यस्तमविज्ञाय मूढधीः ॥
देहेन्द्रियप्राणबुद्धिनेतृत्वं मन्यते त्मनः ।
अतः संसारपदवीं याति जीवेशयोः सदा ।
वैलक्षण्यं परं ज्ञात्वा मुच्यते बद्ध्यतेऽन्यथा ॥ इति च ।

सर्वान् वेदानधीत्य महामनाः अनूचानमानी स्तब्ध एयायेत्यात्मनोऽयं अनूचानत्वादिगुणप्रदं परमविज्ञाय स्तब्धस्य पराधीनत्वज्ञापनेन स्तब्धतां निरस्य तन्निष्ठा हि अत्रोपदिश्यते ।

तद्धैक आहुरसदेवेदमग्र आसीदित्यादि वादिप्रसिद्धमपि निराक्रियते ।

इष्टापूर्तं मन्यमाना वरिष्ठं ।
नान्यत् श्रेयो वेदयन्ते प्रमूढाः ॥
इत्यादिवत् श्रुतितात्पर्यापरिज्ञानप्राप्तं च ।

दर्शितं च ऐकात्म्यं नाम यदिदं केदिद् ब्रूयुर्नैपुणाः इति ।

एकविज्ञानेन सर्वविज्ञानं प्राधान्यात् सादृश्यात् कारणत्वाच्च

52. तद्वशत्वज्ञापनार्थं च सदेव सोम्येदमग्र आसीदित्यादिसृष्टिकथनम् ।

एकविज्ञानेन सर्वविज्ञानं च प्राधान्यात् किञ्चित् सादृश्यात् कारणत्वाच्च । न तु तदन्यस्य मिथ्यात्वात् ।

नहि सत्यज्ञानेन मिथ्याज्ञानं भवति । नहि शुक्तिज्ञः रजतज्ञः इत्युच्यते । विरोधात् तयोः ज्ञानयोः । नेदं रजतमिति अरजतज्ञो हि शुक्तिज्ञः भवति । रजतज्ञश्चेत् न शुक्तिज्ञः । नहि तज्ज्ञः तदभावज्ञः भवति ।

तदभावज्ञस्य तज्ज्ञानपूर्वकत्वं च अन्यत्र तस्य सत्त्वादेव दृष्टम् । तदनङ्गीकारे तदेव न युज्यते ।

53. प्रधानज्ञानादप्रधानस्य ज्ञातवद्व्यपदेशः अस्त्येव । यथा प्रधानपुरुषाणां ज्ञानाह्वाननाशनैः ग्रामः ज्ञातः आहूतः नाशितः इति व्यपदेशः ।

कारणे च पितरि ज्ञाते पुत्रो ज्ञात इति जानाम्येनमस्य पुत्रोऽयमिति व्यपदेश इति । एवमत्राप्येतत् सृष्टं सर्वमित्यादि ।

सादृश्याच्चैकस्त्रीज्ञानादन्यस्त्रीज्ञानमिति । तदेव सादृश्यमत्रापि विवक्षितं यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्यादिना ।

अन्यथा एकशब्दः पिण्डशब्दश्च व्यर्थः स्यात् । मृदा विज्ञातया इत्येतावता पूर्णत्वात् । न हि एकमृत्पिण्डात्मकानि अन्यमृण्मयानि । सादृश्यमेव हि तेषाम् ।

54. यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात् इत्यादिकमपि व्यर्थं स्यात् ।

नहि एकमण्यात्मकमन्यत् लोहमयम् । न चैकनखनिकृन्तनात्मकं सर्वं कार्ष्णायसम् ।

वाचारम्भणश्रुत्यर्थः

वाचारम्भणं विकारः नामधेयं मृत्तिकेत्येव सत्यमित्यत्र च वाचा नाम्नामारम्भणं विकारः अविकृतं नित्यं नामधेयं मृत्तिकेत्येव इत्येतद्वचनं सत्यमिति श्रुत्यर्थः ।

नच वाचारम्भणशब्दः मिथ्यात्वे प्रसिद्धः । वाचारम्भणमात्रमिति च अश्रुतकल्पनम् । तस्मिन् पक्षे नामधेयशब्दः इति शब्दश्च व्यर्थः स्यात् । अतः न कुत्रापि जगतः मिथ्यात्वमुच्यते ॥

जगत्सत्यत्वे प्रमाणवचनानि

55. कविर्मनीषी परिभूः स्वयंभूः ।
'याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः' ।
'यच्चिकेत सत्यमित्तन्न मोघं वसुस्पार्हमुत जेतोत दाता ।
विश्वं सत्यं मघवाना युवोरिदापश्च न प्रमिनन्ति व्रतं वाम्' ।
प्रघान्वस्य महतो महानि सत्यासत्यस्य करणानि वोचम् ।
'अनाद्यनन्तं जगदेतदीदृक् प्रवर्तते नात्र विचार्यमस्ति ।
नचान्यथा क्वापि च कस्य चेदमभूत् पुरा नापि तथाऽभविष्यत् ।'
'असत्यमाहुः जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि ।
यः सत्यरूपं जगदेतदीदृक् सृष्ट्वा त्वभूत् सत्यकर्मा महात्मा ।'
'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ।

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ' ॥ इत्यादेश्च ।

56. ' अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः ।
स्वप्नादिसाम्यं जगतः न तु बोधनिवर्त्यता ॥
सर्वज्ञस्य यतो विष्णोः सर्वदैतत् प्रतीयते ।
बोधासह्यं ततो नैतत् किन्त्वाज्ञावशमस्य हि ॥ '

इति परमोपनिषदि ।

' मायामयम् ' ' अनृतम् ' शब्दयोः अर्थः

' प्रज्ञाविनिर्मितं यस्मादतो मायामयं जगत् ।
अनेनानुगतं यस्मादनृतं तेन कथ्यते ॥
बोधानिवर्त्यमपि तु नित्यमेव प्रवाहतः ।
अ इत्युक्तः परो देवः तेन सत्यमिदं जगत् ॥
तदधीनस्वरूपत्वादसत्यं तेन कथ्यते ।
सत्यस्य सत्यः स विभुः इन्द्रचापस्य सूर्यवत् ' इति ॥

' तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् । '

इति च ।

' महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यते ॥
प्रकृतिः प्रकृष्टकरणाद् वासना वासयेद् यतः ।
अ इत्युक्तः हरिस्तस्य विद्याऽविद्येति संज्ञिता ॥
मायेत्युक्त्वा प्रकृष्टत्वात् प्रकृष्टं हि मयाभिधम् ।
विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्यते ।
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा ॥ इति च ।

नेति नेत्यादिश्रुत्यर्थः

57. ' सर्वे वेदाः हरे भेदं सर्वस्मात् ज्ञापयन्ति हि ।
भेदः स्वातन्त्र्यसार्वज्ञ्यसर्वैश्वर्यादिकश्च सः ।

स्वरूपमेव भेदोऽयं व्यावृत्तिश्च स्वरूपता।
सर्वव्यावृत्तये यस्मात् स्वशब्दोऽयं प्रयुज्यते।
सर्वव्यावृत्ततामेव नेति नेत्यादिका श्रुतिः।
विष्णोरतो वदेदन्या अपि सर्वा न संशयः॥'

इति नारायणश्रुतिः।

अहं ब्रह्मास्मीत्यादिश्रुत्यर्थः

58. 'अहं ब्रह्मास्मि'

'तद्योऽहं सोऽसौ योऽसौ सोऽहम्'

'योऽसावादित्ये पुरुषः सोऽहमस्मि स एवाहमस्मी'त्यादि तु अन्तर्याम्यपेक्षया।'

'स यश्चायं पुरुषे यश्चासावादित्ये स एकः'

'अ इति ब्रह्म तत्रागतमहमिति तस्योपनिषदहमिति'
अहंनामा हरिर्नित्यं अहेयत्वात् प्रकीर्तितः।
त्वं चासौ प्रतियोगित्वात् परोक्षत्वात् स इत्यपि।
सर्वान्तर्यामिणि हरौ अस्मच्छब्दविभक्तयः।
युष्मच्छब्दगताश्चैव सर्वास्तच्छब्दगा अपि।
सर्वशब्दगताश्चैव वचनान्यखिलान्यपि।
स्वतन्त्रत्वात् प्रवर्तन्ते व्यावृत्तेऽप्यखिलात् सदा।
तत्सम्बन्धात्तु जीवेषु तत्सम्बन्धादचित्स्वपि।
वर्तन्त उपचारेण तिङ्पदान्यखिलान्यपि।
तस्मात् सर्वगतो विष्णुरेको भिन्न ततो बहुः।'

इति नारायणश्रुतिः।

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥

इति भगवद्वचनम्।

भेदसत्यत्वे प्रमाणवचनानि

59. न च असत्यो भेदः ।

सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः ।
सत्यः सोऽस्य महिमा गृणे शवे यज्ञेषु विप्रराज्ये ।

'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा । मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः' ।

'आत्मा हि परमस्वतन्त्रः सर्ववित् सर्वशक्तिः परमसुखः परमो जीवस्तु तद्वशः अल्पज्ञः अल्पशक्तिः आर्तः अल्पकः' । इत्यादिश्रुतिभ्यः ।

60. नच अवान्तरसत्यत्वमिदम् ।

यो वेद निहितं गुहायां परमे व्योमन् ।
सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता ।

'एतमानन्दमयमात्मानमुपसंक्रम्य इमान् लोकान् कामान्नी कामरूपी अनुसञ्चरन् । एतत् सामगायन्नास्ते' ।

ऋचां त्वः पोषमास्ते पुपुष्वान् ।
गायत्रं त्वो गायति शक्करीषु ।
ब्रह्मा त्वो वदति जातविद्याम् ।
यज्ञस्य मात्रां विमिमीत उत्वः ॥

'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' ।

'स तत्र पर्येति जक्षन् क्रीडन् रममाणः
स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा अज्ञातिभिर्वा' ।

'यत्र तु अस्य आत्मैवाभूत्' इत्यादिश्रुत्यर्थः

61. 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् तत् केन कं जिघ्रेत् तत् केन कं विजानीयात् येनेदं सर्वं विजानाति तं च केन विजानीयात् विज्ञातारमरे केन विजानीयात्'

'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति'

'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'

'अमृतस्यैष सेतुः'

अक्षण्वतः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षा स उत्वे हृदा इव स्नात्वा उ त्वे ददृशे ॥

ईशमाश्रित्य तिष्ठन्ति मुक्ताः संसारसागरात् ।
यथेष्ट भोगभोक्तारः ब्रह्मान्ता उत्तरोत्तरम् ॥

इति मोक्षानन्तरं भेदश्रुतिभ्यः ।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इति भगवद्वचनम् ।

ॐ जगद्व्यापारवर्ज्यम् ॐ । ॐ प्रकरणादसन्निहितत्वाच्चेति ॐ ।

62. अविनाशी वा अरेऽयमात्मानुच्छित्ति धर्मेति तद्धर्माणामप्यनुच्छित्तेः प्रस्तुतत्वात् । अत्रैव मा भगवान् मोहान्तमापिपन्न प्रेत्य संज्ञास्तीति संज्ञानाशस्य दोषत्वेनोक्तत्वात् ।

यत्रत्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् इति हि आक्षेप एव । नहि भोगाभावो विज्ञातारमरे केन विजानीयादिति विज्ञातुरविज्ञानं चापेक्षितम् ।

अहमित्येव यो वेद्यः स जीव इति कीर्तितः ।
स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः ॥ इति परमश्रुतिः ।

मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत् । इति मोक्षधर्मे ।

63. न तु तद् द्वितीयमस्तीति च । यत्तद् ब्रह्म द्वैतत्वेन न पश्यति तदेव द्वितीयं नेत्याह । यत्ततोऽन्यद् विभक्तत्वेनैव पश्येदिति वाक्यशेषात् । नहि द्रष्टुः दृष्टेः विपरिलोपो विद्यते इति हेतोश्च ।

‘कर्माणि विज्ञानमयः’ इत्यादिश्रुत्यर्थः

64. ‘कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वे एकीभवन्ति’ इत्यत्रापि एकीभावो मत्यैक्यं क्षीराब्ध्यादिस्थिततद्रूपापेक्षया स्थानैक्यं वा।

‘कामेन मे काम आगाद् हृदयाद् हृदयं मृत्योः। यदमीषामदः प्रियं तदैतूपमामभि’।

ब्रह्मत्यनुकूला मे मतिर्मुक्तौ भविष्यति।
अतः प्रायोऽनुकूलत्वमिदानीमपि मे स्थितम्॥

‘येनाक्रमन्ति ऋषयो हि आप्तकामा यत्र तत् सत्यस्य परमं निधानम्’

‘एवमानन्दमयमात्मानमुपसंक्रामति’ इत्यादिश्रुतिभ्यः।

स्वरूपैक्याभिप्राये ‘कर्माणि विज्ञानमयश्चे’ति न युज्यते। नहि तत्पक्षेऽपि कर्मणां ब्रह्मैक्यं मुक्तौ अस्ति।

निवृत्त्यभिप्राये पञ्चदश कलानामपि समत्वात् ‘गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु’ इति अन्यासां कलानां गमनमुक्त्वा कर्मणां विज्ञानात्मनश्चैकीभावकथनं व्यर्थं स्यात् विशेषाभावात्।

‘न च ज्ञाननिवृत्तस्य रजतस्य शुक्त्या एकीभावव्यवहारोऽस्ति।

‘परेऽव्यये’ इति अधिकरणत्वकथनं च भेदज्ञापकम्। अन्यथा पर एव भवन्तीति निर्देशः स्यात्।

जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु।
एकस्थाननिवासो वा व्यक्तिस्थानमपेक्ष्य सः॥
न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः।
स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरूपते। इति परमश्रुतिः।

ब्रह्मविद् ब्रह्मैव भवतीतिश्रुत्यर्थः

65. ब्रह्मविद् ब्रह्मैव भवतीत्यादि च ‘सम्पूज्य ब्राह्मणं भक्त्या शूद्रोपि ब्राह्मणो भवेदितिवत् बृंहितो भवतीत्यर्थः। न हि ब्राह्मणपूजकः स एव ब्राह्मणो भवति।

ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः ।
प्रकृतिः परमं ब्रह्म परमं महदच्युतः ।
तस्मान्न मुक्ता न च सा न क्वचिद् विष्णुवैभवम् ।
प्राप्नुवन्ति स एवैकः स्वतन्त्रः पूर्णषड्गुणः ॥ इति परमश्रुतिः ।
परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
ब्रह्मेशानादिभिः देवैः यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभावः कैवल्यं स भवान् केवलो हरे ॥ इति च ।
यथापि यन्ति तेजांसि महातेजांसि भास्करे ।
पृथक् पृथक् स्थितान्येव तदन्येषामदर्शनम् ।
अप्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचित् ॥ इति नारायणश्रुतिः ।
अतः सर्वागमविरुद्धमेव जीवेश्वरैक्यम् ।

एकजीववादनिरासः

66. तथैव सर्वयुक्तिविरुद्धं च । न तावदेकजीववादो युज्यते । एकाज्ञान-परिकल्पितत्वे च सर्वस्य सर्वमिदं परिकल्पितमिति जानतः पुनः शिष्यादि-बोधनं न युज्यते ।

नहि स्वप्नोऽयमिति निश्चित्य स्वाप्नपुत्रदायार्थं यतते । स्वप्ने तु स्वाप्नत्वाज्ञानादेव यतते ।

न च बहूनां दृश्यमानत्वादस्याज्ञानपरिकल्पितमिदमिति निश्चयो युज्यते । स्वप्ने तु प्रबोधानन्तरमेकस्यावशिष्टत्वात् निश्चयः । न चात्र तथास्ति ।

तस्य तस्य तथा तथा प्रतिपत्तव्यमित्यङ्गीकारे वस्तुनि विकल्पासम्भ-वात् अकल्पितमित्येव स्यात् । न च तथा प्रतिपत्तव्यमित्यत्र प्रमाणमस्ति ।

67. शिष्याज्ञानपरिकल्पितमित्यङ्गीकारे तस्यैवाचार्यभावे स्वयमेव कल्पितो भवतीति सम्यग् ग्रन्थाधिगमस्यैव अनर्थहेतुत्वं स्यात् । न च कस्य-चिन्मुक्तिः । ग्रन्थाधिगमे तस्यैव शिष्याज्ञानपरिकल्पितत्वप्राप्तेः ।

स चैकजीवो यदि भेदवादी भवति तस्य तत्रैव दार्ढ्यात् न कदाचित् भेदनिवृत्तिरिति न कस्यापि मुक्तिः स्यात् तेन यथा कल्पितं तथैव भवतीति तेन एकजीववादिनां नित्यनिरयकल्पने स एव स्यात् ।

न च एकजीवाज्ञानपरिकल्पितं समस्तमित्यत्र किञ्चिन्मानमस्ति ।

'प्रपञ्चो यदि विद्येत इत्यादिश्रुत्यर्थः

68. प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

इत्यस्य च अयमर्थः—प्रपञ्चः यदि विद्येत भवेत उत्पद्येत तर्हि निवर्तेत न च निवर्तते तस्मादनादिरेवायम् ।

प्रकृष्टः पञ्चविधः भेद प्रपञ्चः । न च अविद्यमानोऽयं मायामात्रत्वात् । मायेति भगवत्प्रज्ञा सैव मानत्राणकर्त्री यस्य तन्मायामात्रम् । परमेश्वरेण ज्ञातत्वात् रक्षितत्वाच्च न द्वैतं भ्रान्तिकल्पितमित्यर्थः । नहि ईश्वरस्य भ्रान्तिः ।

तर्हि अद्वैतः सर्वभावानामिति व्यपदेशः कथमित्यतः आह अद्वैतं परमार्थतः इति । परमार्थापेक्षया हि अद्वैतं सर्वस्मादुत्तमः अर्थः स एक एवेत्यर्थः । अन्यथा हि अद्वैतः सर्वभावानामिति व्यर्थं स्यात् । सर्वभावानां मध्ये तस्य एकस्यैव अद्वैतत्वमित्युक्ते समाधिकराहित्यमेव उक्तं स्यात् । अन्येषां सर्वभावानां च समाधिकभावः ।

विकल्पो विनिवर्तेत कल्पितो यदि केनचिदिति वाक्यशेषाच्च न कल्पितत्वमस्येति ज्ञायते । निवर्तते इत्यङ्गीकारे निवर्तेत विद्येतेति च प्रसङ्ग-रूपेण कथनं यदिशब्दौ च न युज्यन्ते ।

विद्येतेत्यस्य च उत्पत्त्यर्थानङ्गीकारे यद्यदस्ति तत्तन्निवर्तते इति व्याप्त्यभावात् निवर्तेत इति न युज्यते ।

अतः प्रपञ्चस्य आनादिनित्यत्वपरमिदं वाक्यम् ।

अतः उपदेशादयं वादोऽज्ञाते द्वैतं न विद्यत इत्याह । अज्ञात एव द्वैतं न विद्यते । अज्ञानिनां पक्ष एव द्वैतं न विद्यते इत्यर्थः ॥

पञ्चभेदनिरूपणम्

69. जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीवभिदा तथा ॥
मिथश्च जडभेदोऽयं प्रपञ्चो भेदपञ्चकः ।
सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ।
न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः ॥
कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते ।
द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् ॥
मतं हि ज्ञानिनामेतन्मितं त्रातं च विष्णुना ।
तस्मात् सत्यमिति प्रोक्तं परमो हरिरेव तु ॥ इति परमश्रुतिः ।

नैरात्म्यवादः

70. मैत्रेयीशाखायां च । अथ ज्ञानोपसर्गाः इत्युक्त्वा अथ ये चान्ये मिथ्यातर्कैः दृष्टान्तैः कुहकेन्द्रजालैः वैदिकेषु परिस्थातुमिच्छन्ति तैः सह न संवसेत् । प्रकाश्या हि एते तस्कराः अस्वर्ग्या इत्याह ।

नैरात्म्यवादकुहकैर्मिथ्यादृष्टान्तहेतुभिः ।
भ्राम्यन् लोको न जानाति वेदविद्यान्तरं तु यद् ॥ इति

आत्मसम्बन्धि किमपि नास्तीतिवादः यद् इति नैरात्म्यवादः ।

अधिष्टानप्रधाने विना न भ्रान्तिः सम्भवति

71. भ्रान्तिकल्पितत्वे च जगतः सत्यं जगद्द्वयमपेक्षितम् । नहि सत्यशुक्तेः सत्यरजतस्य तयोः सादृश्यस्य चाभावे भ्रान्तिरस्ति ।

स्वप्नेपि वासनारूपं सत्यमेव जगन्मनसि स्थितं बहिष्ठत्वेन दृश्यते ।

देहात्मनोरपि एकदेशस्थत्वादिसादृश्यमस्त्येव ।

शङ्खः पीतः नभो नीलमित्यादिष्वपि पीतादयोऽन्यत्र विद्यन्त एव। तत्सादृश्यं च द्रव्यत्वादिकं किञ्चित् शङ्खादीनां चास्त्येव। अतो न कुत्रापि सदृशवस्तुद्वयं विना भ्रमः।

72. नचात्मन्यनात्मभ्रमः क्वचिद् दृष्टः। नहि कश्चिद् अहं अहं न भवामीति भ्रान्तो दृश्यते।

आत्मन्यनात्मभ्रम एवायं प्रपञ्च इति तैरुच्यते। तं विनैव अनात्मनि आत्मभ्रमकल्पने अनात्मनः सत्यत्वं स्यात्। तदा चाद्वितीयत्वकल्पनेऽनात्मैवास्ति नात्मेति भवति।

आत्माज्ञानात्मकत्वे च जगतः आत्मनो भिन्नत्वेन न दृश्येत। नहि शुक्तेः भेदेन रजतं दृश्यते भ्रान्तौ। न चैकमेव युगपद्बहुधा दृश्यते भ्रान्तौ। न चात्मनि भेदभ्रमः क्वापि दृष्टः।

न च कुत्रापि मिथ्योपाधिकृतो भेदः दृष्टः। न च ज्ञानाज्ञानयोरपि मिथ्याकल्पितत्वं दृष्टम्। तद्विषयस्यैवान्यथात्वं भ्रान्तौ। एवमाद्यनन्तयुक्तिविरुद्धोऽयं पक्षः। ग्रन्थबहुत्वं स्यादित्येवोपरम्यते।

73. न च सत्यत्वाङ्गीकारे कश्चिद् दोषः। बहुजीववादिपक्षेऽपि भेदस्य मिथ्यात्वाङ्गीकारे एते दोषाः भवन्त्येव। मिथ्योपाधिकृतं हि तेषामपि बहुत्वम्। न च मिथ्योपाधिकृतो भेदः क्वापि दृष्टः। आत्मनि अनात्मकल्पनारूपत्वात् मिथ्योपाधिरेव न युज्यते।

मायामयीसृष्टिरपि तत्सदृशस्य अन्यस्य विद्यमानत्व एव दृष्टा। द्रव्यत्वादिसादृश्ययुतं किञ्चिदधिष्ठानमाश्रित्यैव च।

अधिष्ठानं च सदृशं सत्यवस्तुद्वयंविना।
न भ्रान्तिर्भवति क्वापि स्वप्नमायादिकेऽ्पि॥
मानस्यां वासनायां तु बहिर्वस्तुत्वकल्पनम्।
स्वाप्नो भ्रमश्च मायायां कर्तृदेहादिवस्तुषु॥

चतुरङ्गबलत्वादिकल्पनं भ्रम इष्यते ।
न भ्रान्तिकल्पितं विश्वमतो विष्णुबलाश्रितम् ॥ इति ब्रह्मवैवर्ते ।
न च मायाविना माया दृश्यते विश्वमीश्वरः ।
सदा पश्यति तेनेदं न मायेत्यवधार्यताम् ॥ इति च ।
अपरोक्षदृशो मिथ्या दर्शनं न क्वचिद् भवेत् ।
सर्वापरोक्षविद् विष्णुः विश्वदृक् तन्न तन्मृषा ॥ इति च ।

'ब्रह्मणः सत्योपाधिसम्बन्धेन बहुजीवभावः' इति मतनिरासः

74. यदि चैकमेव ब्रह्मोपाधिभेदात् संसरति मुच्यते च तदा संसारिणां सर्वदा विद्यमानत्वात् सर्वदा संसार्येव ब्रह्म । अतस्तद्भावोऽपि न मुक्तिः सर्वदोपाधिसम्बन्धत्वात् तस्य ।

न शुद्धस्य नोपाधिसम्बन्ध इति वाच्यम् । उपाधिसम्बन्धस्योपाधिसम्बन्धकल्पनेऽनवस्थाप्रसङ्गात् ।

न च तेनैव सम्बन्धेन सम्बद्धस्य आत्माश्रयप्रसङ्गात् ।

'ब्रह्मणः मिथ्योपाधिसम्बन्धेन बहुजीवभावः' इति वदतः मायावादिनः निरासः

75. इतश्च मिथ्योपाधिः न युज्यते । अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः । अज्ञानं विना मिथ्यात्वासिद्धेः । न च मिथ्योपाधिं विना अज्ञानसिद्धिः मिथ्योपाधिभिन्नस्यैव अज्ञत्वात् ।

शुद्धस्यैवाज्ञत्वे मुक्तस्याप्यज्ञत्वप्रसक्तेः स्वाभाविकत्वात् सत्यत्वात् सद्वितीयत्वप्रसक्तेश्च स्वाभाविकस्य च अनिवृत्त्यङ्गीकारात् अनिवृत्तिप्रसक्तेश्च । सत्यस्य अनिवृत्तिरिति हि तत्पक्षः । अतश्चान्योन्याश्रयता ।

अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः मिथ्योपाधिसिद्धौ जीवसिद्धिः जीवसिद्धौ तदाश्रयाज्ञानसिद्धिरिति चक्रकं वा ।

न च शुद्धमेव भ्रान्त्या अज्ञमिति युक्तम् । अज्ञानसिद्धौ भ्रमसिद्धिः तत्सिद्धौ अज्ञानसिद्धिरित्यन्योन्याश्रयत्वात् ।

अनन्ताः जीवराशयः

76. अनागताः अतीताश्च यावन्तः सहिताः क्षणाः ।
अतीतानागताश्चैव यावन्तः परमाणवः ।
ततोऽप्यनन्तगुणिताः जीवानां राशयः पृथगिति ।
इति वत्सश्रुतेः न संसारिणां परिसमाप्तिरस्मत्पक्षे ।
परमाणुप्रदेशेऽपि हि अनन्ताः प्राणराशयः ।
सूक्ष्मत्वादीशशक्त्यैव स्थूला अपि हि संस्थिताः ।
सहस्रयोजनसमां प्रभावाद्विश्वकर्मणः ।
अनन्ता राशयोऽनन्ताः प्रजानामधिसंस्थिताः ॥ इति स्कान्दे ।

दृष्टस्य वस्तुनः मिथ्यात्वकल्पनं न युक्तम्

77. न च मिथ्यावस्तुनो दुर्घटत्वमेव भूषणम्। दृष्टस्य वस्तुनः मिथ्यात्वकल्पनस्य दृष्टिसकाशात् बलवत्प्रमाणयुक्त्यपेक्षत्वात् । तदभावे सत्यत्वं दृष्ट्यैव सिद्ध्यति ।

नहि अन्नादिकं भोग्यं दृष्ट्वा भोक्तुं सत्यत्वे प्रमाणान्तरमपेक्षते । किन्तु नेदमन्नमिति केनचिदुक्ते कथमिदमन्नत्वेन दृश्यमानमन्नं न भवतीति प्रमाणान्तरमपेक्षते ।

न च प्रत्यक्षदृष्टस्य ततो बलवत् प्रत्यक्षमागमं विना अनुमानादिनैव बाधो दृष्टः । दूरस्थवृक्षह्रस्वत्वादौ प्रत्यक्षापटुत्वस्य निश्चितत्वात् युक्त्या तत्र दीर्घत्वनिश्चयः । प्रत्यक्षस्य हि दूरे मन्दग्राहित्वं परिमाणादौ अन्यथात्वं च ततो बलवत्प्रत्यक्षेणैव निश्चितम् ।

न च जगत्प्रत्यक्षस्य मिथ्यात्वं केनापि प्रमाणेन निश्चितम् ।

विशेषतश्च ज्ञानाज्ञानसुखदुःखात्मभेदादिविषयस्यानुभवस्य न मिथ्यात्वं दृष्टम् ।

अतश्च संसारस्य सत्यत्वात् सत्यस्य च अनिवृत्त्यङ्गीकारात् न मोक्षः स्यात् ।

78. अनुभवसिद्धस्य बलवदनुभवं विना युक्तितः एव मिथ्यात्वाङ्गीकारे आत्मनोऽपि मिथ्यात्वं स्यात्। युक्तिश्च सर्वस्यान्यस्य मिथ्यात्वाङ्गीकारात्। द्विधाकल्पने कल्पनागौरवमिति।

आत्माधिष्ठानभ्रमस्यैवासिद्धेः तस्य अधिष्ठानत्वमपि न युज्यते। दुर्घटत्वस्य च भूषणत्वे दुर्घटमपि आत्ममिथ्यात्वं स्यादेव।

प्रतीतेरपि अविद्याकार्यत्वाङ्गीकारात् तस्याश्च दुर्घटत्वस्य भूषणत्वात् सत्यस्य युक्त्यपेक्षत्वात् घटादीनां द्रष्टृत्वं आत्मनः जडत्वं द्रष्टुः अभावे प्रतीतिः अधिष्ठानं विनैव भ्रमः इत्यादि विरुद्धं सर्वमपि स्यात्।

भेदस्य उपाधिकृतत्वनिरासः

79. उपाधिभेदाङ्गीकारे हस्तपादाद्युपाधिभेदेऽपि तद्गतसुखदुःखादि-भोक्तुः यथा भेदः न प्रतीयते एवमेव शरीरादिभेदेऽपि भोक्तुः न दृश्येत। सर्वदेहगतसुखदुःखादिकमेकेनैव भुज्येत।

यथा च एकाङ्गुल्याद्यपगमेऽपि न मुक्तिः एवमेकोपाध्यपगमेऽपि तस्यैवानन्तोपाधिसम्बद्धत्वान्न मुक्तिः स्यात्।

उद्यतायुधदोर्दण्डाः पतितस्वशिरोऽक्षिभिः।
पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन् युधि।

इति भारतवचनात् न विश्लेषाद् विशेषः।

किञ्च उपाधिः आत्मनः एकदेशं ग्रसति उत सर्वमात्मानम्। एकदेशाङ्गीकारे सावयवत्वम्। सावयवस्य चानित्यत्वं तैः अङ्गीकृतम्। सर्वग्रासे च नोपाधिः भेदकः स्यात्। उपाधिकृतांशकल्पने तदुपाधिकृतत्वे आत्माश्रयत्वम्। उपाध्यन्तरकल्पने अनवस्था।

80. न च ईश्वरस्य सर्वगतत्वात् औपाधिकभेदो ब्रह्मणा भवति। न हि देशतः कालतश्च अपरिच्छिन्नयोः औपाधिकभेदः दृष्टः।

सर्वोपाधिगतत्वाच्च एकस्यैव ईश्वरस्य भेदस्य मिथ्यात्वात् हस्तपादादि-भेदेऽपि भोक्तुः एकत्ववत् सर्वसुखदुःखादिभोक्तृत्वमीश्वरस्यैव स्यात्।

देशतः कालतः अपरिच्छिन्नयोः औपाधिकभेदाभावादेव दुःखिनः अन्यत् शुद्धं ब्रह्म न सिद्ध्यति । अतः स्वाभाविकः संसारः इति अनिवृत्तिरेव स्यात् ।

81. किञ्च विशिष्टस्य शुद्धस्य वा संसारः । शुद्धस्य संसार इत्युक्ते स्वव्याहतिः । विशिष्टस्येत्युक्ते विशिष्टः अन्यः स एव वा । स एव चेदुक्तो दोषः । अन्यश्चेत् नित्यः अनित्यो वा । अनित्यश्चेत् नाश एव न मोक्षः ।

नित्यत्वे च भेदस्य सत्यत्वं मोक्षेऽपि तस्य भावात् ।

स्वरूपमात्रस्याभेदः उपाधिभिन्न एवेत्यङ्गीकारे स्वरूपमेव उपाधिसम्बद्धमिति न तस्य शुद्धत्वम् ।

अशुद्धस्वभावस्य न कदाचित् शुद्धत्वमिति तत्पक्षः । उपाधिमिथ्यात्वाङ्गीकारे च अन्योन्याश्रयत्वादिदोषाः उक्ताः ।

न च अनादिकर्मभेदात् भेदः । औपाधिकभेदसिद्धौ कर्मभेदसिद्धिः तत्सिद्धौ च तत्सिद्धिरिति अन्योन्याश्रयत्वात् ।

अतोऽनन्तदोषदुष्टत्वात् ग्रन्थबहुत्वं स्यादित्येवोपरम्यते । अतः सर्वप्रमाणविरुद्धत्वात् न अभेदे श्रुतितात्पर्यम् ।

शून्यवादमायावादयोः न विशेषः

82. सर्वशब्दावाच्यस्य लक्षणापि न दृष्टेति न तस्य शास्त्रगम्यत्वम् । अतो अवाच्यत्वाज्ञेयत्वात् शून्यमेव तदिति प्राप्तम् ।

न च स्वेनापि ज्ञेयत्वं तैरुच्यते । कर्तृकर्मविरोध इति ते वदन्ति । न च स्वरूपमन्यद्वा ज्ञेयं ज्ञातारं च विना ज्ञानं दृष्टम् । अतो ज्ञातृज्ञेयाभावात् ज्ञानस्यापि शून्यतैव । अतः शून्यवादात् न कश्चिद् विशेषः । न च ज्ञातृज्ञेयरहितं ज्ञानं क्वापि दृष्टम् ।

अप्राप्तत्वाच्च ईश्वरभेदस्य न अभेदे श्रुतितात्पर्यं युज्यते ।

सदागमैः भगवान् नारायणः एव विज्ञेयः

सर्वोत्तमं सर्वदोषव्यपेतं गुणैः अशेषैः पूर्णमन्यं समस्तान् ।
वैलक्षण्यात् ज्ञापयितुं प्रवृत्ताः सर्वे वेदाः मुख्यतो नैव चान्यत्
इति महोपनिषदि ।

अतः सदागमैरेव सर्वस्माद् भिन्नत्वेन सर्वस्माद् विशिष्टत्वेन च विज्ञेयो भगवान् नारायणः इति सिद्धम् ।

इति श्री आनन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्वविनिर्णये
प्रथमः परिच्छेदः ॥ १ ॥

॥ द्वितीयः परिच्छेदः ॥

नारायणः समतीतक्षराक्षरः

83. ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः ।
लक्ष्मीरक्षरदेहत्वात् अक्षरा तत्परो हरिः ॥
स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः ।
निस्सीमत्वेन ते सर्वे तद्वशाः सर्वदैव च ॥
सर्गस्थितिक्षययतिप्रकाशावृतिबन्धनम् ।
सर्वक्षराणामेकः स कुर्यात् सात्विकमोक्षणम् ॥
सर्गस्थितियतिज्योतिर्नित्यानन्दप्रदोऽक्षरे ।
चेष्टाप्रदश्च सर्वेषामेक एव परो हरिः ॥
तस्य नान्योऽस्ति सर्गादिकर्ता निर्दोषकश्च सः ॥ इति परमश्रुतिः ।
ब्रह्मशेषसुपर्णेशशक्रसूर्यगुहादयः ।
सर्वे क्षरा अक्षरा तं श्रीरेका तत्परो हरिः ॥ इति स्कान्दे ।

84. यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं सुमेधाम्
अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ ।

अहं जनाय समदं कृणोमि अहं द्यावापृथिवी आविवेश
अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तस्समुद्रे ॥

यमन्तः समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः
यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम् ।
यदोषधीभिः पुरुषान् पशूंश्च विवेश भूतानि चराचराणि ।
अतः परं नान्यदणीयसं हि परात् परं यन्महतो महान्तम् ॥
यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसःपरस्तात् ।
'तदेवर्तं तदु सत्यमाहुः तदेव ब्रह्म परमं कवीनाम्'।

'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रमथे हविर्भिः ।
विदेहि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विना विरावत्'।

चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ।

85. एको नारायण आसीत् न ब्रह्मा नेशानो नाग्नीषोमौ नेमे द्यावा-पृथिवी ।

एको नारायण आसीत् न ब्रह्मा न च शङ्करः । स मुनिर्भूत्वा समचिन्तयत् तत एते व्यजायन्त । विश्वो हिरण्यगर्भोऽग्निः यमो वरुण-रुद्रेन्द्राः ।

वासुदेवो वा इदमग्र आसीत् न ब्रह्मा न च शङ्करः ।
नेन्द्रसूर्यौ न च गुहो न सोमो न विनायकः ।

इत्यादिश्रुतिभ्यश्च ।

यस्मात् परं न, अपरमस्ति किञ्चिदित्यत्रापि अपरमस्तीत्येवार्थः । अन्यथा तेनेदं पूर्णं ततो यदुत्तरतरं तदरूपमनामयमिति वाक्यशेष-विरोधात् । तेनेदमित्युक्तमेव तत इति परामृश्यते । अन्यथा यस्मात् परं नेत्युक्तिविरोधात् ।

86. नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ति ।
अस्यैव सर्वनामानि व्यतिरिक्तस्य सर्वतः ।
यः स्वतन्त्रः सदैवैकः स विष्णुः परमो मतः ॥
इत्यादिश्रुतिभ्यः अन्यनामान्यस्यैवेति नान्येषां सर्वेश्वरत्वादिकमुच्यते ।

सर्ववेदेष्वप्यस्य अदोषवचनात् आदौ अभावावचनाच्च तद्वचनाच्च अन्येषां सर्वेषां वेदेषु सर्वेषु । तेषां सर्वनामत्वानुक्तेश्च ।

उत्पत्तिर्वासुदेवस्य प्रादुर्भावो न चापरः ।
देहोत्पत्तिः तदन्येषां ब्रह्मादीनां तदीरणात् ।
देहोऽनादिर्हरेर्नित्यो ब्रह्मादीनामनित्यकाः ।
मुख्योत्पत्तिः तदन्येषां प्रादुर्भावो हरेर्जनिः ॥ इति परमश्रुतेश्च ।

इति श्री आनन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्वविनिर्णये
द्वितीयः परिच्छेदः ॥ २ ॥

॥ तृतीयः परिच्छेदः ॥

नारायणः निर्दोषाशेषसद्गुणः

87. वर्जितः सर्वदोषैर्यः गुणसर्वस्वमूर्तिमान् ।
स्वतन्त्रो यद्वशाः सर्वे स विष्णुः परमो मतः ॥
इति परमोपनिषदि ।

नित्यपूर्णाखिलगुणः निर्दोषः सर्वदैव यः ।
यः स्वतन्त्रः परो विष्णुः जन्ममृत्यादिवर्जितः ॥

नारद उवाच—

निर्दोषश्चेत् कथं विष्णुः मानुषेषूदपद्यत ।
चिन्ताश्रमव्रणाज्ञानदुःखयुग् दृश्यते कथम् ॥

एष मे संशयो ब्रह्मन् हृदि शल्य इवार्पितः ।
अनुद्धार्योऽपरैर्मर्त्यैः सूक्तिशक्त्या तमुद्धर ॥

ब्रह्मोवाच—

स्त्रीपुंमलाभियोगात्मा देहो विष्णोर्न जायते ।
किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम् ॥

प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा ।
तथाप्यसुरमोहाय परेषां च क्वचित् क्वचित् ॥

दुःखाज्ञानभ्रमादीन् सः दर्शयेत् शुद्धसद्गुणः ।
क्व व्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे ।
दौर्लभ्यायैव मोक्षस्य दर्शयेत् तान्यजो हरिः ॥

मिथ्यादर्शनदोषेण तेन मुक्तिं न यान्ति च ।
तमो यान्ति च तेनैव तस्माद् दोषविवर्जितम् ।
प्रादुर्भावगतं चैव जानीयाद् विष्णुमञ्जसा ॥ इति ब्रह्माण्डे ।

88. गुणक्रियादयो विष्णोः स्वरूपं नान्यदिष्यते ।
अतो मिथोऽपि भेदो न तेषां कश्चित् कदाचन ॥

स्वरूपेऽपि विशेषोऽस्ति स्वरूपत्ववदेव तु ।
भेदाभावेऽपि तेनैव व्यवहारश्च सर्वतः ॥ इति परमोपनिषदि ।

अभिन्नत्वमभेदश्च यथा भेदविवर्जितम् ।
व्यवहार्यं पृथक् च स्यादेवं सर्वे गुणाः हरेः ॥

अभेदाभिन्नयोः भेदो यदि वा भेदभिन्नयोः ।
अनवस्थितिरेव स्यात् न विशेषणतामतिः ॥

मूलसम्बन्धमज्ञात्वा तस्मादेकमनन्तधा ।
व्यवहार्यं विशेषेण दुस्तर्कबलतो हरेः ॥

विशेषोऽपि स्वरूपं स स्वनिर्वाहकतास्य च। इति ब्रह्मतर्के।
'एकमेवाद्वितीयं तत्' 'नेह नानास्ति किञ्चन'
'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'
यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति
एवं धर्मान् पृथक् पश्यन् तानेवानु विधावति। इत्यादिश्रुतेश्च।
देशः सर्वत्र पुरुषः स्वतन्त्रः कालनित्यता।
इत्यादिषु स्वसम्बन्धात् यथैव गुणरूपिणः॥
गुणित्वं गुणभोक्तृत्वं स्याद् विष्णोः तच्च स स्वयमिति ब्रह्मतर्के।

89. विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः।
निर्दुःखानन्दभुङ्नित्यं तत्समीपे स मोदते।
मुक्तानां चाश्रयो विष्णुरधिकोऽधिपतिस्तथा॥
तद्वशाः एव ते सर्वे सर्वदैव स ईश्वरः। इति परमश्रुतिः।

'अमृतस्यैष सेतुः, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इत्यादि च।

नृपाद्याः शतधृत्यन्ताः मुक्तिगाः उत्तरोत्तरम्।
गुणैः सर्वैः शतगुणाः मोदन्त इति ह श्रुतिः॥ इति पाद्मे।

अतो निश्शेषदोषवर्जितः पूर्णोऽनन्तगुणो नारायण इति सिद्धम्।

90. यस्य त्रीणि उदितानि वेदवचने रूपाणि दिव्यानि अलम्। बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत्। वायो रामवचो नयं प्रथमकं पृक्षो द्वितीयं वपुः। मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे॥

स्वतन्त्रायाखिलेशाय निर्दोषगुणरूपिणे।
प्रेयसे मे सुपूर्णाय नमो नारायणाय ते॥

इति श्री आनन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्वविनिर्णये
तृतीयः परिच्छेदः॥ ३॥

॥ समाप्तश्चायं ग्रन्थः॥

॥ श्रीः ॥

श्री आनन्दतीर्थभगवत्पादाचार्यविरचितः

विष्णुतत्वविनिर्णयः

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥

I continuously offer my salutations to Lord Nārāyaṇa who is absolutely free from blemishes, who possesses infinite auspicious attributes, who is distinct and superior to Kṣara i.e., Jīvas and Jaḍas, Akṣara i.e., goddess Lakṣmi, and who is chiefly conveyed by the sacred scripture.

Expl. (1) In this benedictory verse both Lakṣaṇa i.e., definition of Nārāyaṇa, and Pramāṇa i.e., the source of his knowledge are given. अशेषसद्गुण gives his definition, सदागमैकविज्ञेय mentions the fact that sacred scripture is the source of his knowledge. निर्दोष refers to the fact that he is absolutely free from the blemishes such as पारतन्त्र्य.

(i) नारायणस्य लक्षणान्याह । निर्दोषेति । निर्दोषश्चासौ अशेषसद्गुणश्चेति विग्रहः । अत्र निर्दोषग्रहणेन पारतन्त्र्यराहित्यादीनि, अशेषसद्गुणमित्यनेन परिपूर्णानन्दत्वादीनि च अनन्तानि लक्षणानि सूचितानि । (J.T.)

(ii) The propriety of the adjective सत् to गुण in the definition could be understood in two ways: (i) दुःखादीनां गुणत्वेन व्यवहारात् सदिति. Some consider दुःख etc., inauspicious attributes also as qualities, to exclude these the adjective सत् is added to गुण. (ii) उत्पत्त्यादिराहित्यं गुणानां

सच्छब्देन आचष्टे। The attributes of Lord Nārāyaṇa are permanent. These do not arise temporarily, this is indicated by सत् (J.T.)

(2) समतीतक्षराक्षरम् reveals his supremacy and unique nature. It means जडजीव प्रकृतिभ्यः अत्यन्तविलक्षणम्। Here Kṣara stands for Jīvas and Jaḍa, Akṣara for Lakṣmi. Lord Nārāyaṇa surpasses them. He is supreme and distinct from them. Prakṛti refers to Chitprakṛti i.e., Lakṣmi.

ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः ।
लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिः ॥ (परमश्रुतिः)

Though जड is not expressly mentioned here, it goes without saying that he is distinct from and superior to Jaḍa also. Therefore, the expression क्षराक्षर refers to जड also by लक्षणा. क्षराक्षरपदाभ्यां जडमप्युपलक्ष्यते। (J.T.) The way in which Lakṣaṇā is to be resorted to here is discussed in detail by the commentators on Śrī Jayatīrthā's Tīkā. समतीतक्षराक्षरम् is also a definition of Nārāyaṇa.

(3) Nārāyaṇa is the chief purport of the sacred scripture and he is conveyed by the scripture only. These two implications are made clear by the word एक in the compound word सदागमैकविज्ञेयम्. The adjective सत् added to आगम excludes पाशुपत etc., that are not considered as authoritative in Vaiṣṇava tradition. विज्ञेयम्–वि विशिष्टतया विलक्षणतया ज्ञेयम्। By the adjective सदागमैकविज्ञेयम् two points are made: (i) The sacred scripture is the only source for the knowledge of Nārāyaṇa, not Pratyakṣa, Anumāna etc., other means. (ii) The sacred scripture chiefly conveys him and his glory only.

(4) Ānandatīrthā has no obstacles for completing this work undertaken by him as in the case of other

authors. Nor does he salute Nārāyaṇa only occasionally. सदा वन्दे इत्यनेन मम नारायणवन्दनं न प्रत्यूहविरहादिप्रयोजनोद्देशेनेति सूचयति ।

(5) The title of this work i.e., **विष्णुतत्वविनिर्णय** is explained as under :

(i) विष्णुरूपतत्वस्य विष्णोः चिदचित्प्रकृत्यादिसर्वतत्वानां वा सर्वोत्तमत्व-सत्यत्वादिरूपेण विनिर्णयः यस्मात् तं ग्रन्थमित्यर्थः । (R.T.)

(ii) विष्णोः तत्वं विशेषेण निर्णीयते इति करणव्युत्पत्त्या, विष्णोः तत्वं विष्णुतत्वं तस्य निर्णयः यस्मादिति व्यधिकरणबहुव्रीहिणा वा विष्णुतत्वविनिर्णयशब्दवाच्यं प्रकरणम् । (S.T.)

Plan of this work

**2. वि. नि.—विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात् सज्जनसंविदे ।**

I shall establish the doctrines conveyed by the adjectives given to Nārāyaṇa in the above benedictory verse by quoting the authorities from the scripture and the arguments not contrary to the scripture for the comprehension of the deserving persons in the order in which these adjectives are mentioned above.

Expl. (1) In this verse the **अनुबन्धचतुष्टय** viz., **विषय, प्रयोजन, सम्बन्ध** and **अधिकारिन्** are mentioned. **नारायण** as described in the benedictory verse is **विषय**; **संविद्** i.e., the knowledge of Nārāyaṇa and through this attaining liberation is **प्रयोजन**; **सज्जन** is **अधिकारिन्**. Once these three are spelt out the **सम्बन्ध** i.e., the relevant relations among these is the relation.

*

(i) एतद्विशेषणवति नारायणे सन्त्येव अज्ञानसन्देहविप्रतिपत्तयः इत्यनेन विषयः दर्शितः ।

(ii) संविदे इति प्रयोजनाभिधानम् । . . . सन्ति च तथाविधाः पुरुषाः येषां सुखावाप्त्यादिकमपि न प्रार्थ्यं किन्तु परमेष्ठस्य नारायणस्य संविदेव । अथवा संविच्छब्देन तत्साध्यः मोक्षः उपलक्ष्यते ।

(iii) सज्जनेति मुमुक्षवः तस्मात् विषयप्रयोजनसम्बन्धाधिकारिसम्पन्नत्वात् आरम्भणीयं प्रकरणमिति स्थितम् । (J.T.)

(2) सदुक्तिभिः—सदागमैः, तत्प्रामाण्यं च साधयिष्यामीति भावः ।

यद्वा सत्यः वेदाद्याः उक्तयः अनुग्राहिकाः येषामनुमानादीनां तानि सदुक्तीनि तैः ।

क्रमात्—निर्देशक्रम एवात्रोक्तः न तु आकांक्षाक्रमः ।

The Sacred Literature

3. वि. नि.—

ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम् ।
मूलरामायणं चैव पुराणं चैतदात्मकम् ॥
ये चानुयायिनस्तेषां सर्वे ते च सदागमाः ।
दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥
ज्ञेय एतैः सदायुक्तैः भक्तिमद्भिः सुनिष्ठितैः ।
न च केवलतर्केण नाक्षजेन न केनचित् ।
केवलागमविज्ञेयो भक्तैरेव न चान्यथा ॥ इति ब्रह्माण्डे ।

Rigveda, Yajurveda, Sāmaveda and Atharvaveda, Mahābhārata, the entire Pancharātra, Original Rāmāyaṇa, the Purāṇas that are not contrary to these and all such works that follow these are the sacred

scripture. The other texts that are opposed to these and indifferent to the tenets in these, are perverted texts. These do not help to know Nārāyaṇa.

Nārāyaṇa could be known by this sacred scripture by those who are continuously engaged in the study of these, who are devoted to Nārāyaṇa, and who have the firm faith in him.

Nārāyaṇa cannot be comprehended by mere speculation or sense-perception or any other such means. He can be comprehended by the sacred scripture only and by the devoted persons only. Not in any other way.

Expl. (1) The sacred literature is listed here. The study, devotion and faith are laid down as the requirements to comprehend Nārāyaṇa through this sacred literature. It is also pointed out that mere speculation or logic does not help to comprehend the Supreme God Nārāyaṇa.

(2) पञ्चरात्रगतानां जीवजननादिवाचिनां केषांचिद् वाक्याना-मप्रामाण्यं केचिदाचक्षते तन्निरासार्थमखिलमित्युक्तम्। (J.T.)

Certain passages of **पञ्चरात्र** such as

वासुदेवात् संकर्षणो नाम जीवो जायते।
संकर्षणात् प्रद्युम्नसंज्ञं मनो जायते॥

are not considered as authoritative by other systems of Vedānta. But these can be properly interpreted and their authoritativeness shown as

जीवाभिमानिशेषस्य नाम्ना संकर्षणस्य तु।
वासुदेवाज्जनिः प्रोक्ता (A.V.)

Therefore, it is specifically stated here that the entire

Pancharātra is authoritative. The authoritativeness of the entire Pancharātra is declared as

'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् ।'

'ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते ।'

This is discussed in the उत्पत्त्यधिकरण of Brahmasūtras. (V.T.)

(3) Reference to the original Rāmayaṇa is found in Vālmīki Rāmāyaṇa itself as

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥ (V.T.)

A gist of the original Rāmāyaṇa is given in the Mahābhārata Tātparyanirṇaya of Śrī Madhvācārya and Sangraha Rāmāyaṇa of Nārāyaṇa Panditācārya. The present Vālmīki Rāmāyaṇa is only a later version of the original Rāmāyaṇa. In Madhva tradition this original Rāmāyaṇa is considered as authoritative. Vālmīki Rāmāyaṇa has to be understood and interpreted in the light of this.

(4) (i) एतदात्मकम्–ऋगाद्यनुकूलं पुराणम्, एषाम्–ऋगादीनां अनुयायिनः अनुकूलग्रन्थाः मानवाद्याः, तदन्ये-तद्विरुद्धाः, तदुदासीनाश्च

(ii) सदा युक्तैः–वेदाद्यर्थविषये सदाभियोगयुक्तैः, भक्तिमद्भिः- यः यत्र आदरवान् तस्यैव तद्वस्तु विद्यमानमपि स्फुरति न तु अनादर- वतः अन्यत्र आदरवतश्चेति अनुभवसिद्धम् । (J.T.)

Vaiśeṣikas are not interested in the study of Veda. The Mimāmsakas, though study the Vedas, they are not devoted to Nārāyaṇa. Therefore, these two fail to comprehend Nārāyaṇa through Veda and other sacred literature.

(iii) केवलः–वेदाद्यनुकूलरहितः, न केनचित्–अर्थापत्त्यादि- व्यावृत्त्यर्थमिदमुक्तम्, यद्वा केन चित्–सदा युक्तत्वादिरहितेन पुरुषेण । (J.T.)

The Sacred Literature is the only source to know the Supreme God

4. वि. नि.—

'नावेदविन्मनुतेदं बृहन्तं सर्वानुभूमात्मानं साम्पराये' इति तैत्तिरीयश्रुतिः।

'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ' इति कठश्रुतिः।

'नेन्द्रियाणि नानुमानं वेदाह्येवैनं वेदयन्ति तस्मादाहुः वेदाः' इति पिप्पलादश्रुतिः।

न चैतेषां वचनानामेवाप्रामाण्यम्। अपौरुषेयत्वाद् वेदस्य। 'इतिहासपुराणः पञ्चमो वेदानां वेदः' इति तद्गृहीतत्वाच्च।

He who does not know the Veda etc., sacred scripture will not be able to comprehend the Supreme God who possesses infinite attributes and who is omniscient. The Veda teaches the Supreme God to enable the seeker to obtain the liberation—thus states the Taittirīya Śruti.

The knowledge of the Supreme God cannot be obtained by logic nor it can be removed by the logic if already obtained. The knowledge of the Supreme God imparted by a competent teacher will lead to the vision of the God—thus states Kāthaka Śruti.

Not the senses, nor the inferences help one to ccmprehend the God. Vedas alone enable to comprehend him—thus states Pippalāda Śruti.

These statements cannot be treated as not authoritative. The Vedas are not the compositions of any individual. 'Itihāsa and Purāṇa are the fifth Veda

among the Vedas' — these are in agreement with the Vedas.

Expl. (1) Several Vedic passages are quoted here to support that the Supreme God could be comprehended only by the sacred scripture and not by any other means. It is further stated that since the Vedas are not the compositions of any individual, these are free from Puruṣadoṣa.

(2) (i) वेदशब्देन सर्वे सदागमाः गृह्यन्ते, सर्वमनुभवतीति सर्वानुभूः, आत्मानम्–परमात्मानम्, साम्परायः–मोक्षः।

(ii) आपनेया–आ अप इति विरुद्धार्थयोः उपसर्गयोः क्रमेण सम्बन्धः। एषा परमात्मविषया मतिः शुष्केण तर्केण आनेया उत्पाद्या अपनेया निराकार्या च न भवति, अन्येन–जीवेश्वरादिभेदज्ञानिना भगवद्भक्त्यादिमता आचार्येण प्रोक्ता वेदप्रवचनेन उत्पादितैव सुज्ञानाय साक्षात्काराय भवति। (J.T.)

(3) The statements that suffer from **अनृतत्व, व्याघात, पुनरुक्ति** and **निरर्थकत्व** defects are not valid. However, these drawbacks are found only in the statements of individuals. Vedas are not the compositions of any individual. Therefore, these are free from the above drawbacks. Śrī Jayatīrtha quotes some of the Vedic passages that appear to have these drawbacks and points out that this criticism is not tenable.

Revealed literature is the only source of Dharma, Adharma etc., that are beyond sense perception

5. वि. नि.—न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम्। तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः।

यस्य तौ नाभिमतौ नासौ समयी। समयप्रयोजनाभावात्।

न च तेन लोकोपकारः धर्माद्यभावज्ञाने परस्परहिंसादिना अपकारस्यैव प्राप्तेः । न चोपकारेण तस्य प्रयोजनं अदृष्टाभावात् । अतो धर्माद्यभावं वदता स्वसमयस्य आनर्थक्यमंगीकृतमेवेति नासौ समयी ।

It cannot be contended that there can be no statement which is not composed by a person. Because, if a statement that is not made by any individual is not accepted, that is to say, if impersonal verbal authority is not accepted, then, Dharma, Adharma etc., ethical and religious tenets, that are beyond sense-perception will go without a source of authority to convey them. However, these tenets i.e., Dharma, Adharma etc., that are beyond sense-perception are accepted by all religious and philosophical thinkers.

One who does not accept Dharma, Adharma ete., is not a religious and philosophical thinker at all. Because, such a thinker's philosophy will go without a subject and a purpose. He cannot claim that teaching the absence of Dharma, Adharma etc., itself is his subject, because, such a teaching will not foster people's welfare. On the contrary, if people come to believe that there is no Dharma, Adharma etc., to regulate them, they will become more and more aggressive. This will result in a calamity to the people.

Further, nothing is gained by a philosopher who teaches the absence of Dharma, Adhama etc. He does not believe in the results beyond the world of sense-perception (and no results within the world of sense-perception accrue to him by teaching the absence of Dharma, Adharma etc.). Therefore, a philosopher who claims to teach the absence of Dharma, Adharma etc.,

has to tacitly accept the purposelessness of his teaching and therefore, he is not a philosopher at all.

Expl. (1) Here, it is pointed out that revealed nature of the scripture i.e., Vedas has to be accepted by all. Normally a verbal statement is personal. It is always made by an individual. It is composed by an individual. However, the possibility of revealed statements that are not made by any person cannot be totally ruled out. This is because, certain ethical and religious tenets like Dharma, Adharma etc., are believed by all. These have to be conveyed by some authority. Sense perception, inference etc., do not convey these tenets, because, these are beyond these sources of knowledge. Revealed scripture is the only authority to convey these. This is pointed out in this passage. Those who do not subscribe to the very tenets of Dharma, Adharma etc., cannot claim to be religious and philosophical thinkers. Propagation of the absence of Dharma, Adharma etc., will do more harm to the society than help.

(2) धर्मादिकं तावत् अतीन्द्रियं वस्तु सर्वसमयानामभिमतम् । न चापौरुषेयं वाक्यं विना धर्मादिसाधकं प्रमाणमस्ति । अत: सर्वैः समयिभि: अपौरुषेयं वाक्यमङ्गीकर्तव्यम् । (J.T.)

(3) न तावत् लोकायतशास्त्रस्य ऐन्द्रियक: विषय: । प्रत्यक्षतः एव तत्सिद्धौ शास्त्रानपेक्षणात् । तत: धर्मादिकमतीन्द्रियं विषयत्वेनाङ्गीकार्यम् । तदपि चेन्नाङ्गीक्रियते शास्त्रस्य निर्विषयत्वेन निष्फलत्वेन च काकदन्तपरीक्षाग्रन्थवत् अशास्त्रत्वमापद्येत । (J.T.)

(4) ननु धर्माद्यनङ्गीकारेऽपि न शास्त्रस्य विषयादिशून्यत्वम् । धर्माद्यभावस्यैव विषयत्वात् । वेदादिजनितया भ्रान्त्या धर्मादिसद्भावस्य

प्रसक्तत्वेन तदभावप्रतिपादनस्य उपपन्नत्वात् इति तत्राह न च तेन लोकोपकारः इति। धर्माद्यभावज्ञाने परस्परहिंसादिना अपकारस्यैव प्राप्तेः । (J.T.)

Human compositions cannot be the source of Dharma, Adharma etc.

6. वि. नि.—न च पौरुषेयेण वाक्येन तत्सिद्धिः अज्ञानविप्रलम्भयोः प्राप्तेः ।

न च तदर्थत्वेन सर्वज्ञः कल्प्येत । अन्यत्र अदृष्टस्य सर्वज्ञत्वस्य कल्पनं तस्य अविप्रलम्भकत्वकल्पनं तस्य तत्कृतत्वकल्पनं चेति कल्पनागौरवप्राप्तेः ।

अपौरुषेयवाक्याङ्गीकारे न किञ्चित् कल्प्यम् ।

Dharma, Adharma etc., tenets that are beyond sense-perception cannot be comprehended through the statements or compositions made by individual persons. There is a possibility of ignorance and deception on the part of such persons.

The entire Veda conveys the difference of the God from all i.e., Jīvas and Jada. This difference is nothing but the supremacy, independence, omniscience etc., attributes of the God. The distinction from others is the very nature of the God. The distinction is the very nature of an entity. The term 'Sva' in the word Svarūpa indicates its distinction from all others. The Śruti 'Neti Neti' etc., conveys the distinction of God from all others. All other Śrutis also convey the same.

Expl. (1) In this section the fact that the entire Veda conveys the distinction of the God from all others is stressed again. The objection how can Śruti convey two chief purports viz., the supremacy of the God and the distinction of the God from all others is answered by pointing out that the two attributes viz., supremacy and distinction are not different from each other both being the very nature of the God.

(i) सर्वेऽपि वेदाः भगवतः सर्वस्मात् भेदमेव बोधयन्तीत्यत्र श्रुतिमेव पठति । सर्वे वेदाः इति ।

(ii) सर्वे वेदाः हरेः सर्वस्मात् जीवजडात्मकात् भेदं ज्ञापयन्तीत्ययुक्तं 'सर्वोत्कर्षे देवदेवस्य विष्णोः' इति तद्गुणोत्कर्षे सर्ववेदानां महातात्पर्यस्योक्तत्वेन तद्विरोधात्। नहि एकस्य उभयत्र महातात्पर्यमुपपद्यते इत्यत आह भेद इति। स च भेदः स्वातन्त्र्यादिरूपः इत्यन्वयः। गुणोत्कर्षः भेदः इति एक एव अर्थः। अतो न विरोधः।

(iii) वस्तुनः या अन्यस्माद् व्यावृत्तिः। या च स्वरूपता तदुभयं तावदेकमेव।

(iv) स्वरूपशब्दान्तर्गतः रूपशब्दः वस्तुपरः स्वपरसाधारणः इति स्वशब्दस्य प्रयोगः। ततश्च 'सिद्धे सति आरम्भः नियमार्थः' इति इतरसर्वव्यावृत्तिबोधनाय स्वशब्दः प्रयुज्यते इति लभ्यते। एवं च सर्वतोव्यावृत्तं रूपं स्वरूपमित्यर्थः सम्पद्यते। अतः सर्वस्मात् व्यावृत्तिरपि हरेः स्वरूपमेव। विशेषविवक्षायां तु स्वातन्त्र्यादिगुणैः तन्निमित्तया सर्वतो व्यावृत्त्या च विशिष्टे हरौ तात्पर्यमिति भावः।

The points made in the above remarks are as under :

(i) The distinction of an entity from all others constitutes the very nature of that entity. The essential nature of an entity and the distinction of that entity from all others are not different.

(ii) **स्वातन्त्र्य, सार्वज्ञ्य, सर्वैश्वर्य** etc., attributes of the God are identical with the God and are his very essential nature. The distinction of the God from all others is also an internal attribute and identical with the God. In view of this, the Svātantrya, Sārvajnya etc., attributes and the attribute distinction are essentially not different from each other. Further, all these are not different from the God. Therefore, there is nothing wrong in saying that both the supremacy of the God and the distinction of the God from all others are the chief purport of the entire Veda. In

fact, these are not two purports but two statements of one and the same purport.

(iii) Though the attributes of the God and the God are identical, and different attributes of the God are also identical, one can talk of them as if these are different on account of Viśeṣa.

Interpretation of Abheda Srutis

58. वि. नि.—

'अहं ब्रह्मास्मि'

'तद्योऽहं सोऽसौ योऽसौ सोऽहम्'

'योऽसावादित्ये पुरुषः सोऽहमस्मि स एवाहमस्मी'त्यादि तु अन्तर्याम्यपेक्षया।'

'स यश्चायं पुरुषे यश्चासावादित्ये स एकः'

'अ इति ब्रह्म तत्रागतमहमिति तस्योपनिषदहमिति'

अहंनामा हरिर्नित्यं अहेयत्वात् प्रकीर्तितः।
त्वं चासौ प्रतियोगित्वात् परोक्षत्वात् स इत्यपि।
सर्वान्तर्यामिणि हरौ अस्मच्छब्दविभक्तयः।
युष्मच्छब्दगताश्चैव सर्वास्तच्छब्दगा अपि।
सर्वशब्दगताश्चैव वचनान्यखिलान्यपि।
स्वतन्त्रत्वात् प्रवर्तन्ते व्यावृत्तेऽप्यखिलात् सदा।
तत्सम्बन्धात्तु जीवेषु तत्सम्बन्धादचित्स्वपि।
वर्तन्त उपचारेण तिङ्पदान्यखिलान्यपि।
तस्मात् सर्वगतो विष्णुरेको भिन्न ततो बहुः।'

इति नारायणश्रुतिः।

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेपु तज्ज्ञानं विद्धि सात्त्विकम्॥

इति भगवद्वचनम्।

The God who is in me is Brahma i.e., Guṇapūrṇa.

The God who is in me is in the Sun and the God who is in the Sun is in me.

The God who is in Āditya is in me.

In all these the reference is to Antaryamin i.e., the God present within.

The God who is in Puruṣa and is in Āditya is one.

'अ' refers to Brahman and the word 'Aham' conveys Brahman. This is the secret name of Brahman.

The God is called 'Aham' since nobody can leave him. He is called 'Tvam' as he is always in front. He is called 'Sah' as he is beyond senses.

All case suffix forms of the word Asmad, Yuṣmad, and Tat convey the God. All numbers also convey the God though he is one. All these convey him since he is independent and supreme. These convey the Jīvas and Jada only secondarily. The verbal suffixes also convey him. Lord Viṣṇu is everywhere. He is distinct from all and he has many forms. Thus states Nārāyaṇa Śruti.

Such knowledge of the God which conveys the fact that he is present in all beings which are mutually distinct and distinct from him, he is imperishable, he has no internal distinctions and is Supreme is Sātvika knowledge. This is stated by Lord himself in the Gīta.

Expl. (1) In this section, certain Śruti passages that superficially appear to convey Abheda are quoted to show that these convey Antaryamitva but not Abheda.

(2) (i) तत्र आद्ये वाक्ये (अहं ब्रह्मास्मीति वाक्ये) अहं शब्देन अन्तर्यामिणं निर्दिश्य तस्य देशकालपूर्णत्वलक्षणं ब्रह्मत्वमुच्यते।

(ii) द्वितीये (योऽहं सोऽसौ) वाक्ये स्थानभेदेन अन्तर्यामिणोऽपि भेदशङ्कायां स्वान्तर्यामिणः सूर्यान्तर्गतेन परमात्मना ऐक्यमभिधाय पुनरिन्द्रार्जुनादिवदवान्तरविशेषनिरासाय योऽसौ सोऽहमिति सूर्यान्तर्गतस्य स्वान्तर्यामिणा ऐक्यमुच्यते। तृतीयेऽपि एवमेव।

(3) अनेन तत् त्वमस्यादिवाक्ये त्वंशब्देन अन्तर्यामी इत्यपि सूचितम्।

(4) विभक्तेषु—परस्परं परमेश्वराच्च भिन्नेषु, सर्वभूतेषु—चेतनाचेतनेषु अविभक्तं स्वगतभेदवर्जितम्, एकं भावम्—सर्वोत्तमम्।

The difference between Brahman and Jiva is real

59. वि. नि.—

न च असत्यो भेदः।

सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः।
सत्यः सोऽस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये।

'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा। मैवारुवण्यो मैवारुवण्यो मैवारुवण्यः'।

'आत्मा हि परमस्वतन्त्रः सर्ववित् सर्वशक्तिः परमसुखः परमो जीवस्तु तद्वशः अल्पज्ञः अल्पशक्तिः आर्तः अल्पकः'। इत्यादिश्रुतिभ्यः।

The difference is not unreal. All beings are happy by the grace of the Supreme God who is praised by the God Indra. This position (the Supreme God being the support and the others being dependent upon him) is the true position.

I offer prayers to the Supreme God of great glory during the sacrifices in order to obtain the happiness.

The God is real, the Jīvas are real, their difference is real, their difference is real, their difference is real.

The evil minded shall not pray him, the evil minded shall not pray him, the evil minded shall not pray him.

The God is absolutely independent, omniscient, omnipotent, has infinite bliss and is supreme while the Jīva is entirely dependent upon the God, has very limited knowledge, very limited power; suffers, and is very inferior.

Expl. (1) In this section, the Śruti passages that affirm the difference between the God and the Jīvas and show the contrast between the two are quoted.

(2) (i) गृणतः स्तुवतः मघोनः देवस्य इन्द्रस्य रातिं मित्रमेनं विष्णुमनु तस्माद्धेतोः विश्वे सर्वेऽपि प्राणिनः मदन्ति हृष्यन्ति इत्येतदीश्वरस्य जीवानां च उपजीव्योपजीवकत्वं सत्यम् ।

(ii) सः प्रागुक्तः विष्णोः महिमा सत्यः । तं सत्यमहिमानं अहं विप्रराज्येषु यज्ञेषु शवे सुखमुद्दिश्य गृणे स्तौमि ।

(iii) शपथत्वेन सत्यं भिदा इति त्रिरुक्तिः । आरुभिः दोषिभिः वन्यः वननीयः भजनीयः नैव ।

60. वि. नि.—

नच अवान्तरसत्यत्वमिदम् ।
यो वेद निहितं गुहायां परमे व्योमन् ।
सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता ।

'एतमानन्दमयमात्मानमुपसंक्रम्य इमान् लोकान् कामान्नी कामरूपी अनुसञ्चरन् । एतत् सामगायन्नास्ते' ।

ऋचां त्वः पोषमास्ते पुपुष्वान् ।
गायत्रं त्वो गायति शक्करीषु ।
ब्रह्मा त्वो वदति जातविद्याम् ।
यज्ञस्य मात्रां विमिमीत उत्वः ॥
'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' ।
'स तत्र पर्येति जक्षन् क्रीडन् रममाणः
स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा अज्ञातिभिर्वा' ।

The difference is not Vyāvahārika. He who knows the Supreme God at the heart and in his great abode, enjoys all desires being together with the omniscient God.

Reaching the Supreme God of infinite bliss, the liberated moves into these worlds assuming the forms that he desires and enjoying the things that he desires, sings these Sāman hymns.

One Chaturmukhabrahmā sings the Ṛgveda hymns, One Chaturmukhabrahmā sings the Gāyatra Sāman, One Chaturmukhabrahmā recites the Pauruṣeya literature and One Chaturmukhabrahmā meditates upon Lord Viṣṇu.

The liberated reaches the Supreme God, attains his true nature and moves along with those who are liberated with him and also who are liberated earlier, eating, sporting, moving on chariots with women.

Expl. (1) Advaitins contend that the difference between the God and the Jīvas is only Vyāvahārika. This is present only during Samsāra i.e., transmigration. This difference will not continue after liberation. To counter this contention it is pointed out here that the difference

*

continues even after liberation and it is real. This position is affirmed by quoting passages from Ṛgveda, Upaniṣads and the other sacred literature.

(2) (i) अवान्तरसत्यत्वं–व्यावहारिकसत्यत्वं न।

(ii) ब्रह्मणा सह इति भेदोक्तिः। न च ब्रह्मणा ब्रह्मरूपेण सर्वान् कामान् अश्नुते इति व्याख्येयम्। ब्रह्मात्मैक्यत्वं प्राप्तस्य कामावाप्त्यनङ्गीकारात्।

(iii) उपसंक्रम्य इति समीपप्राप्त्युक्त्या भेदः प्रतीयते।

(iv) त्वः कश्चिद् ब्रह्मा। In this hymn the expression त्वः used in four places, refers to four liberated Chaturmukha-brahmās who are engaged in reciting Ṛgveda etc., as stated in the hymn. It does not refer to Brahmā priest in the ordinary sacrifice. In the ordinary sacrifice there will be only one Brahmā priest. Here four are referred to. Therefore, these are liberated Chaturmukhabrahmās. This hymn relates to the liberated.

मोक्षविषयं च एतद् ब्रह्मबहुत्वाभिधानात्। अतीतानन्तकल्पेषु मुक्तानां ब्रह्मणां बहुत्वोपपत्तेः। नच वाच्यं ऋत्विग्विषयमेतदिति। एकस्मिन् यज्ञे अनेकेषां ब्रह्मणामभावात्।

(v) परं ज्योतिः परमात्मानमुपसम्पद्य तत्समीपं प्राप्येति भेदोक्तिः। ज्ञातयः–सह मुक्ताः, अज्ञातयः–कल्पान्तरे मुक्ताः।

The difference continues in the liberated state

61. वि. नि.—'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् तत् केन कं जिघ्रेत् तत् केन कं विजानीयात् येनेदं सर्वं विजानाति तं च केन विजानीयात् विज्ञातारमरे केन विजानीयात्'

'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति'

'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'

'अमृतस्यैष सेतुः'

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षा स उत्वे ह्रदा इव स्नात्वा उत्वे ददृश ॥

ईशमाश्रित्य तिष्ठन्ति मुक्ताः संसारसागरात् ।
यथेष्ट भोगभोक्तारः ब्रह्मान्ता उत्तरोत्तरम् ॥

इति मोक्षानन्तरं भेदश्रुतिभ्यः ।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

इति भगवद्वचनम् ।

ॐ जगद्व्यापारवर्ज्यम् ॐ । ॐ प्रकरणादसन्निहितत्वाच्चेति ॐ ।

In case only nirviśeṣa chinmatra remains after liberation, then, by what the liberated can see and what he can see, by what he can smell and what he can smell, by what he can know and what he can know, by what he can see him by whom he knows all this, and by what he can know himself the knower ?

Just as pure water poured into pure water, one will attain similar nature.

Then, the liberated getting rid of undesired Puṇya and Pāpa, attains similarity with the God in respect of being free from sorrow.

The God is the abode for the liberated. The liberated will have the eyes and the ears, they will have affection for the other liberated, they will have gradation in respect of knowledge etc. Some among these will sport in the Milk ocean, some others in the forests. These will be as calm as lakes and will see the God.

All those who are liberated from the transmigration find their shelter under the God. They enjoy the bliss in a graded way the Chaturmukhabrahmā being the highest among them.

In all these, the difference even after liberation is stated.

Having obtained this knowledge the liberated will attain similarity with me (in respect of the absence of sorrow). These will not be born again at the time of creation, nor will these suffer at the time of destruction.

The liberated will get all the desires excepting the power to create, sustain, etc. This is clear from the context and the inability of the Jīvas to create.

Expl. (1) Some more Śruti passages are quoted here to show that the difference continues in the liberated state.

(2) In the passage 'यत्र तु अस्य आत्मैवाभूत्' etc., the untenability of the contention that निर्विशेषचिन्मात्र only remains after liberation, is indicated. This passage is discussed in detail later.

(3) तादृगेव न तु तदेव, निरञ्जनः—निर्लेपः साम्यम्—निर्दुःखत्वादिसादृश्यम्, अमृतस्य—मुक्तजातस्य, सेतुः—आश्रयः, मुक्ताः सखायः—परस्परं प्रीतिमन्तः, मनोजवेषु—प्रज्ञादिगुणेषु, असमाः—तारतम्योपेताः, आदघ्नासः—आदघ्नाः बहुप्रमाणक्षीराब्धिमन्तः, उपकक्षासः—उपकक्षाः कक्षस्य वनस्य उप समीपे उ एव वर्तमानाः वनक्रीडारताः।

(4) जगद्व्यापारवर्जं मुक्तः सर्वान् कामानवाप्नोतीत्यैश्वर्यमर्यादोक्त्या जगद्व्यापारवतः हरेः भेदः अवगम्यते।

The Sruti 'यत्र तु अस्य' etc., is प्रसङ्गापादन

62. वि. नि.—अविनाशी वा अरेऽयमात्मानुच्छित्ति धर्मेति तद्धर्माणामप्यनुच्छित्तेः प्रस्तुतत्वात् । अत्रैव मा भगवान् मोहान्तमापिपन्न प्रेत्य संज्ञास्तीति संज्ञानाशस्य दोषत्वेनोक्तत्वात् ।

यत्रत्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् इति हि आक्षेप एव । नहि भोगाभावो विज्ञातारमरे केन विजानीयादिति विज्ञातुरविज्ञानं चापेक्षितम् ।

अहमित्येव यो वेद्यः स जीव इति कीर्तितः ।
स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः ॥
इति परमश्रुतिः ।

मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत् ।
इति मोक्षधर्मे ।

'The Ātmā is indestructible, his attributes are also indestructible'. In this passage it is stated that the attributes of Ātman are also indestructible.

'In this respect only you have confused me by saying that there is no knowledge after liberation'. By this remark the ceasing of knowledge is objected to by Maitreyi.

Therefore, the statement 'If Ātman alone remains after liberation, whom can one see and by what' etc., is only a prasangāpādana i.e., pointing out an adverse consequence (but not a statement of fact). In this passage it is not intended to state the absence of knowledge to the liberated, nor is it the intention to state that the knower will not know even himself.

The Parama Śruti clearly states that 'Jīva knows himself as 'I'. He undergoes the experiences of

joy and sorrow. He is eligible for the bondage and the liberation'.

The Mokṣadharma states that there cannot be a greater sorrow than being steeped in ignorance.

Expl. (1) Advaitin's contention that '**यत्र तु अस्य आत्मैव अभूत् तत् केन कं पश्येत्**' etc., passage conveys the fact that the liberated will not have any activity such as seeing, knowing etc., is refuted here. According Advaita interpretation the passage '**यत्र तु अस्य आत्मैवाभूत् तत् केन किं पश्येत्**' etc., describes the liberated state as a state when the liberated does not see, does not know and so on. That is to say the liberated is devoid of action, result, relation, etc. The state of bondage is described in '**यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति**' etc., and the liberated state is described in '**यत्र तु अस्यात्मैवाभूत्**' etc. The two states are contrasted in these two passages.

क्रियाकारकफलसम्बन्धस्य अत्यन्तमुच्छेदो हि अत्र मुक्तस्य उच्यते। तथाहि 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यादिना अविद्यामयीं संसारावस्थां प्रदर्श्य 'यत्र तु अस्य आत्मैवाभूत्' इत्यादिना तद्विलक्षणां मुक्त्यवस्थां दर्शयति।

This contention of Advaitin is refuted here.

The full text of these passages is as under:

(i) यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति इतर इतरं पश्यति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरमनुजानाति।

(ii) यत्र वा अस्य सर्वमात्मैवाभूत् तत् केन कं जिघ्रेत् तत् केन कं पश्येत् तत् केन कं शृणुयात् तत् केन कमभिवदेत् तत् केन कं मन्वीत तत् केन कं विजानीयात् येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयात्।

According to Dvaita interpretation this passage does not describe the liberated state as a state of the absence of seeing, knowing etc., but it states the adverse consequences of holding such a view. It is an argument to refute the position taken by Advaitin that only Ātman i.e., chinmatra remains after liberation. This is clear from the other statements in this context. An important passage in this connection is, '**अविनाशी वाऽरे अयमात्मा अनुच्छित्तिधर्मा**'. In this passage it is clearly stated that neither **आत्मस्वरूप** is destroyed nor **आत्मधर्म**s viz. **ज्ञान, सुख** etc., are destroyed. This clearly shows that the remaining of **चिन्मात्र** alone is not intended to be conveyed in this discourse.

यदि निर्विशेषचैतन्यमात्रमवशिष्यते न किमपि वस्तु इति मतं स्यात् तदा दर्शनघ्राणादिरूपभोगोऽस्य न स्यात्। तथा येन ईश्वरेण इदं सर्वं जीवो विजानाति तज्ज्ञानाभावश्च प्रसज्येत। एवं विज्ञातुः आत्मनोऽपि ज्ञानं न स्यात्। निर्विशेषत्वेन कर्तृकर्मभावविरोधात्। भवितव्यं च दर्शनादिभोगेन ईश्वरज्ञानेन आत्मज्ञानेन च। अतः निर्विशेषचैतन्यमात्रावस्थानलक्षणोऽपि मोक्षः अनुपपन्नः इत्यापादनात्मकः आक्षेप एव अस्य वाक्यस्य अर्थः। (J.T.)

If **निर्विशेष चिन्मात्र** alone remains after liberation, then, there shall be no seeing, smelling etc., experiences. There shall be no knowledge of the God who enables the Jīva to know. There shall be no knowledge of Jīva himself. However, the liberated must have the knowledge of the God and the knowledge of himself. Therefore, the contention that the attainment of **निर्विशेष चिन्मात्र** state is liberation is not correct.

(2) 'यत्र तु अस्ये'ति आक्षेप एव न वस्तुस्थितिकथनम्। आक्षेपशब्दः अत्र प्रसङ्गार्थः। यत्र तु अस्येत्यादिना मुक्तौ भेदानङ्गीकारे प्रसङ्गः आपादनात्मा क्रियते।

The passage 'यत्र तु अस्यात्मैवाभूत् तत् केन कं पश्येत्' etc., does not state that the liberated does not see, does not know etc., but protests that if the liberated does not retain his distinction he will not be able to see, to know etc.

(3) The fact that the liberated will not lose his attributes ज्ञान, सुख etc., is made clear in the passage 'अविनाशी वाऽरे अयमात्मा अनुच्छित्तिधर्मा'. In this passage it is clearly stated that the liberated will not lose either his distinct individuality or his attribute, ज्ञान, सुख etc.

मुक्तस्य न केवलं स्वरूपस्य, ज्ञानादीनां धर्माणामपि अनुच्छित्तेः प्रस्तुतत्वात्। स्वरूपविनाशस्य अविनाशीत्यनेनैवोक्तत्वात् (अनुच्छित्ति-धर्मा इति धर्मनाशस्य उक्तत्वात्)

(4) Further, Maitreyi herself has pointed out that the statement न प्रेत्य संज्ञा अस्ति i.e., there will be no knowledge after liberation—is a confusing statement. Because, this is not an acceptable position. The liberated state is the highest state and to talk of the absence of knowledge in that state is ridiculous.

भगवान् अत्रैव अवश्यवेदितव्ये एव विषये मां मोहान्तं आपिपत् प्रापितवान्। प्रेत्य मोक्षानन्तरं संज्ञा ज्ञानं नास्तीति। न चेदं सम्यग् ज्ञानम्। परमपुरुषार्थे मोक्षे ज्ञानाभावस्य असम्यक्त्वात्। मोक्षस्य अपुरुषार्थत्वप्रसङ्गः मैत्रेयी वाक्यस्य अर्थः।

This protest of मैत्रेयी was due to her misunderstanding the import of न प्रेत्य संज्ञास्ति. She had understood it as total absence of the knowledge on the part of a liberated. Therefore, Yajñavalkya clarifies that न वा अरे अहं मोहं ब्रवीमीत्यलं वा अर इदं विज्ञानाय। I am not confusing you. I say the liberated are capable of knowledge. What was

denied in the statement 'न प्रेत्य संज्ञा अस्ति' could be understood in two ways :

(i) After liberation the liberated will not be known to the unliberated. (ii) The liberated will not have the type of knowledge i.e., वृत्तिज्ञान that they used to have before liberation. They will have only स्वरूपज्ञान after liberation. In order to get this import made clear Maitreyi protested that you are confusing me. Therefore, the total absence of knowledge on the part of the liberated is not the import of the statement न प्रेत्य संज्ञास्ति.

The full text of this discourse is as under :

विज्ञानघन एव एतेभ्यः भूतेभ्यः समुत्थाय तान्येव अनुविनश्यति न प्रेत्य संज्ञास्तीति अरे ब्रवीमीति होवाच याज्ञवल्क्यः ।

सहोवाच मैत्रेयी अत्रैव मा भगवन् अमूमुहन् न प्रेत्य संज्ञास्तीति ।

स होवाच न वा अरे अहं मोहं ब्रवीमीति अलं वा अरे इदं विज्ञानाय ।

The liberated soul that had the body of Bhūtas i e., elements gets rid of the body of Bhūtas i.e., elements and attains the Supreme God. No unliberated will have the knowledge of liberated. The liberated will not have Vṛtti-jñāna.

Maitreyi said : Revered Sir, you are confusing me in this vital matter. You state that the liberated will have no knowledge. (How can such liberation be the goal of life if it is a knowledgeless state ?)

Then Yajñyavalkya explained : O Maitreyi ! I am not confusing you. The liberated are capable of knowledge.

विज्ञानघन एव एतेभ्यः भूतेभ्यः समुत्थाय तान्येव अनुविनश्यति इति संसारे जीवस्य भूतोत्पत्तिविनाशनिमित्तौ उत्पत्तिविनाशौ इत्यभिधाय 'न प्रेत्य संज्ञास्ति' इति मुक्तस्य भूतानां विनिवृत्तत्वात् तन्निमित्तं वृत्तिज्ञानं नास्तीति याज्ञवल्क्येन उक्तम् ।

The points made in this discourse are as under :

(i) The passage 'न प्रेत्य संज्ञा अस्ति' does not state the total absence of knowledge to the liberated. It only states the absence of वृत्तिज्ञान.

(ii) यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति etc., states that the knowledge is possible only if there is knower-known distinction. Since there is no total absence of knowledge in the liberated state, the knower-known distinction continues in the liberated state.

(iii) यत्र तु अस्य सर्वं आत्मैवाभूत् तत् केन कं पश्येत् etc., points out the adverse consequences of the position that there will not be knower-known distinction in the liberation. Such pointing out of adverse consequences is known as प्रसङ्गापादन.

To avoid such a contingency the knower-known distinction has to be accepted. Therefore, the passage यत्र तु सर्वमात्मैवाभूत does not support the Advaita contention that चिन्मात्रविशेष only remains in liberation but objects to it.

Interpretation of the Sruti 'न तु तद्द्वितीयमस्ति' etc.

63. वि. नि.—न तु तद् द्वितीयमस्तीति च। यत्तद् ब्रह्म द्वैतत्वेन न पश्यति तदेव द्वितीयं नेत्याह। यत्ततोऽन्यद् विभक्तत्वेनैव पश्येदिति वाक्यशेषात्। नहि द्रष्टुः दृष्टेः विपरिलोपो विद्यते इति हेतोश्च।

In the passage 'there is no second' it is stated that whatever the God does not see as second i.e., distinct, that does not exist as second i.e., distinct. Because, in the following sentence it is stated that whatever he sees as distinct that is only distinct. The reason is also stated that the God's comprehension cannot be false.

Expl. In this section the interpretation of the passage : ' यद् द्वैतं न पश्यति पश्यन् वै तन्न पश्यति। नहि द्रष्टुः दृष्टेः विपरिलोपो विद्यते । अविनाशित्वात् न तु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येत् ' is discussed.

According to Advaita interpretation, in this passage it is stated that during the deep sleep one sees and also does not see. That is to say, one has knowledge and also does not have the knowledge. He has the knowledge of himself, because, the knowledge of the knower i.e., self, never ceases to exist. He has no knowledge, because, nothing other than self exists during the deep sleep state.

सुप्तः पश्यन् वै ज्ञानवानेव तन्न पश्यति । कुतः ज्ञानवत्वम् । नहि द्रष्टुः दृष्टेः विपरिलोपो वर्तते अविनाशित्वात् । कथं पश्यन्नेव न पश्यति । यत् ततः स्वस्मात् अन्यद् विभक्तं पश्येद् तद् द्वितीयं नास्ति । अतः विषयाभावात् न पश्यतीत्युच्यते । निर्विषयस्य स्वरूपज्ञानस्य स्थितत्वात् पश्यन्नित्यपि ।

In short, according to Advaitin this passage conveys that during the deep sleep state one has **निर्विषयस्वरूपज्ञान** but not **बाह्यविषयज्ञान** since no **बाह्यविषय** exists from his point of view.

This description of deep sleep state is intended to show that there is no **भेदज्ञान** during deep sleep state. On this ground it is further intended to show that there will be no **भेद** or **भेदज्ञान** in the liberated state. **एवं अविद्याकार्यविलयमात्रेण सुप्तस्यापि द्वैताभावः तदा कुतो मोक्षे अविद्यायां सर्वात्मना निवृत्तायां द्वैतसद्भावः ।**

This interpretation of Advaitin is not correct.

From the context of this passage it can be made out that here the Abheda of different forms of the God present

in Nādis is stated. It is also stated that **जीव** and **जड** are different from the God.

In a previous passage of this section viz., '**ता वा अस्यैता हिता नाम नाड्यः यथा केशः सहस्रधा भिन्नः तावता अणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णाः**' it is stated that the Jīva remains in these Nāḍis during deep sleep state in which the God is present in his five forms **शुक्ल नील** etc. This gives an impression that these forms of the God are different from each other.

In the same context in a further passage viz., **तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं** a distinction between **रूप** and **रूपिन्** appears to have been stated.

To remove these two impressions and point out the non-distinction among different forms of the God present in Nādis is the intention of the passage **यद् द्वैतं न पश्यति पश्यन् वै तत् न पश्यति** etc.

'शुक्लस्य नीलस्ये'त्यादिपूर्ववाक्ये परस्परं विलक्षणनानारूपवद्भिः भगवद्रूपैः नाडीनां व्याप्तत्वमुक्तम्। तेन तद्रूपाणां भेदः प्राप्तः। तथा 'तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति षष्ठ्या रूपरूपिणोर्भेदश्च। तन्निराकर्तुं यद् द्वैतमिति वाक्यम्। (R.K.)

In the light of this the import of the passage '**यद् द्वैतं न पश्यति**' etc., is as under:

हृदयस्य भवतीति हृदयशब्देन प्रकृतं ब्रह्म भगवान् यद् यस्मात् शुक्लादिकं रूपं स्वतः अन्योन्यं भिन्नं न पश्यति। तत् द्वितीयं भिन्नं नास्त्येव। तावता कथमभावः इत्यतः पश्यन् सर्वज्ञोऽपि तं न पश्यति। एवं तर्हि जीवजडात्मकमपि विश्वं किं ततो न भिन्नं नेत्याह। यद् यस्मात् भगवान् जीवजडात्मकं विभक्तं स्वतः भिन्नं पश्येत् तस्मात् ततोऽन्यदेव।

In this explanation of the import of 'यद् द्वैतं न पश्यति' etc., passage two points are made: (i) since the omniscient God does not see any distinction among his different forms शुक्ल, नील etc., there is no distinction among these. (ii) Since the God sees Jīva and Jada as distinct from him these are distinct.

Such comprehension of the God cannot be false because he is omniscient seer and whatever seen by him cannot be false. नहि द्रष्टुः दृष्टेः विपरिलोप., द्रष्टुः परमेश्वरस्य दृष्टेः ज्ञानस्य विपरिलोपः वैपरीत्यं अयथार्थत्वं न विद्यते अविनाशित्वात् निर्दोषत्वात् अबाधितत्वाच्च ।

The reference to द्रष्टा and दृष्टि clearly shows that the distinction between the two is shown here and there is no scope for any kind of non-distinction. अत्र वाक्ये द्रष्टृ-दृष्ट्योः सम्बन्धकथनेन निर्विशेषत्वं बाध्यते ।

Interpretation of the Sruti 'कर्माणि विज्ञानमयश्च' etc.

64. वि. नि.—'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वे एकीभवन्ति' इत्यत्रापि एकीभावो मत्यैक्यं क्षीराब्ध्यादिस्थित-तद्रूपापेक्षया स्थानैक्यं वा ।

'कामेन मे काम आगाद् हृदयाद् हृदयं मृत्योः । यदमीषामदः प्रियं तदैतूपमामभि'।

ब्रह्ममत्यनुकूला मे मतिर्मुक्तौ भविष्यति ।
अतः प्रायोऽनुकूलत्वमिदानीमपि मे स्थितम् ॥

'येनाक्रमन्ति ऋषयो हि आप्तकामा यत्र तत् सत्यस्य परमं निधानम्'

'एवमानन्दमयमात्मानमुपसंक्रामति' इत्यादिश्रुतिभ्यः ।

स्वरूपैक्याभिप्राये 'कर्माणि विज्ञानमयश्चे'ति न युज्यते । नहि तत्पक्षेऽपि कर्मणां ब्रह्मैक्यं मुक्तौ अस्ति ।

निवृत्त्यभिप्राये पञ्चदश कलानामपि समत्वात् 'गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु' इति अन्यासां कलानां गमनमुक्त्वा कर्मणां विज्ञानात्मनश्चैकीभावकथनं व्यर्थं स्यात् विशेषाभावात् ।

न च ज्ञाननिवृत्तस्य रजतस्य शुक्त्या एकीभावव्यवहारोऽस्ति ।

'परेऽव्यये' इति अधिकरणत्वकथनं च भेदज्ञापकम् । अन्यथा पर एव भवन्तीति निर्देशः स्यात् ।

जीवस्य परमैक्यं तु बुद्धिसारूप्यमेव तु ।
एकस्थाननिवासो वा व्यक्तिस्थानमपेक्ष्य सः ॥
न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः ।
स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरूपते ।

इति परमश्रुतिः ।

In the passage 'the Abhimāni deities of Karma and the liberated Jīva attain the identity of thought with the imperishable Supreme God' the Ekībhāva i.e., identity is in respect of thought only, or it is identity of place with the forms of the God that are in Milk ocean etc., places.

Let my desire be the same as that of the God, let my heart think in the same way in which the God thinks, let those things that are delighting to the God be delighting to me (thus prays the liberated.)

After liberation my thought will follow the thought of the God. Therefore, now also my thought is as per his thought.

The sages whose desires are fulfilled attain the place where the God is present.

The liberated attain the blissful God.

From these Śruti passages the identity of thought and place is indicated.

If the identity of the very nature is to be taken, then, to mention Karma and Jīva will not suit the context. Even according to them (Advaitins) Karma does not attain identity with Brahman in liberation.

If the withdrawal of Karma is intended, then, it will be common with the other fifteen Kalās. Stating the withdrawal of the other fifteen Kalās and the deities, to state the identity of Karma and Jīva is meaningless. No special purpose is served by this.

The Rajata that is sublated is not considered as 'became identical' with Śukti.

The locative use as 'in the imperishable God' indicates the distinction. If the identity was intended the statement would have been as 'become the Supreme.'

The mention of the identity between the Jīva and the God indicates only the similarity of thought. It also indicates the common place. It never indicates the very identity of their nature as the two are different in nature. The difference is in respect of independence, and dependence, and infinite nature and finite nature.

This is stated in Parama Śruti.

Expl. (1) In this section the interpretation of the following Śruti is discussed.

गताः कलाः पञ्चदशप्रतिष्ठाः देवाश्च सर्वे प्रतिदेवतासु ।

कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वे एकीभवन्ति ॥

According to Advaita interpretation this Śruti conveys that 'At the time of the liberation the fifteen Kalās of the person to be liberated merge into their respective sources, the Abhimāni deities of these get into their original form, the actions performed by that person are eliminated and he himself attains the identity with the imperishable Supreme.'

गताः कलाः इत्यत्र मुक्तस्य परमात्मैक्यं स्फुटमेवोच्यते। तथाहि मुक्तिकाले देहारम्भकाः प्राणाद्याः पञ्चदश कलाः प्रतिष्ठाः स्वकारणानि प्रतिगताः भवन्ति। तदभिमानिनो देवाश्च सर्वे प्रतिदेवतासु स्वमूलरूपेषु गताः भवन्ति। कर्माणि विदुषा कृतानि निवृत्तानि। विज्ञानमयश्चात्मा विद्वान् परे अव्यये परमात्मनि सर्वे एकीभवन्ति।

This interpretation of Advaita is untenable.

(2) The expression एकीभवन्ति does not mean the identity of the liberated and the Brahman for the following reasons :

(i) एकीभाव is mentioned with reference to the two viz. कर्म and विज्ञानमय. There cannot be any identity of कर्म with ब्रह्मन् since कर्म is non-sentient. कर्मणामपि परमेश्वरेण ऐक्यकथनं न युज्यते। न हि तत्पक्षेऽपि (अद्वैतिपक्षेऽपि) कर्मणा ब्रह्मैक्यं मुक्तौ अस्ति। जडानां चिदात्मना ऐक्यं तैरपि नाङ्गीकृतम्।

(ii) To avoid the above contingency, to interpret एकीभाव as निवृत्ति so far as कर्मs are concerned is not possible. The same expression cannot be interpreted in two ways viz. as identity in case of विज्ञानमय i.e., जीव and as निवृत्ति i.e., withdrawal in case of कर्म.

Further, there is withdrawal in the case of other fifteen Kalās. This being common to पञ्चदश कला and कर्म, the statement should have been as गताः कलाः षोडश. For

the same act of निवृत्ति to use the expression गताः in case of fifteen कला and एकीभाव in case of कर्म does not make proper sense.

यदि कर्माणि एकीभवन्ति इत्यस्य निवर्तन्ते इत्यभिप्रायः स्यात् तदा पञ्चदशानामपि कलानां निवृत्तिसाम्यात् कर्मणोऽपि कलात्वात् गताः कलाः षोडशेति वक्तव्यम्। पृथङ् निवृत्तिकथनं व्यर्थं स्यात्। किञ्च कर्मव्यतिरिक्तानां कलानां 'गताः' इति शब्देन कर्मणां तु एकीभवन्तीति शब्दान्तरेण निवृत्तिकथनं व्यर्थं स्यात्।

Therefore, the expression एकीभाव does not mean स्वरूपैक्य in this Śruti.

(3) The correct meaning of the expression एकीभाव here is मत्यैक्य—the identity of thought and स्थानैक्य—the identity of place. Such identity of जीव and ब्रह्मन् is mentioned in several other Śruti passages. A few such passages are quoted in this section. One of the passages quoted is 'कामेन मे काम आगाद्' etc. This passage is interpreted as follows :

मृत्योः संहर्तुः ईश्वरस्य कामेन इच्छानुसारेणैव मे कामः आगात् मुक्तौ आगच्छतु। मृत्योः हृदयात् हृदयं सङ्कल्पमनुसृत्यैव मे हृदयं सङ्कल्पं आगच्छतु। अमीषां अमुष्य मृत्योः यददः प्रियं तदेव मामभि आ सम्यक् एतु मामपि प्रियं भवतु। इति मुमुक्षुणा प्रार्थ्यते।

It is such identity of thought of the liberated with the God that is conveyed by the expression एकीभवन्ति. The liberated remaining in the same place such as Milk ocean with the God is also conveyed by this expression. The स्वरूपैक्य is not at all intended here.

(4) Keeping the above meaning of एकीभाव in mind this passage has to be interpreted as follows :

*

प्राणाद्याः पञ्चदश कलादेवताः अन्ये च प्रतिदेवतासु प्रतिबिम्बभूतासु प्रजासु प्रतिष्ठाः स्थितिहेतवः सर्वे देवाः कर्माणि कर्माभिमानिनी देवता च विज्ञानमयः आत्मा च इत्येते सर्वे परमात्मानं प्राप्य तस्मिन्नेव स्थिताः एकीभवन्ति प्राग् विभिन्नमतयः अधुना ऐकमत्यं प्राप्नुवन्ति ।

Thus the fact of कलादेवता, प्रतिदेवता and मुक्त जीवs attaining the identity of thought, that is to say, these strictly following the thought of the God, is described by एकीभवन्ति but not स्वरूपैक्य of मुक्त जीव and ब्रह्मन्.

The way in which स्वरूपैक्य is explained by Advaitin is also not logical. They say that the Jīva gets sublated or eliminated by ब्रह्मज्ञान. Such sublation cannot be described as identity. For instance, when the Rajata is sublated by realising that it is not Rajata, it is not said that it attained identity with the Śukti.

Further, the expression परे अव्यये is in the locative case suffix. This shows that the two are not identified but one finds its abode in the other. If the identity was intended, then, the statement would have been पर एव भवन्ति ।

Interpretation of the Sruti 'ब्रह्मविद् ब्रह्मैव भवति'

65. वि. नि.—ब्रह्मविद् ब्रह्मैव भवतीत्यादि च 'सम्पूज्य ब्राह्मणं भक्त्या शूद्रोपि ब्राह्मणो भवेदि'तिवत् बृंहितो भवतीत्यर्थः । न हि ब्राह्मणपूजकः स एव ब्राह्मणो भवति ।

ब्रह्माणि जीवाः सर्वेपि परब्रह्मणि मुक्तिगाः ।
प्रकृतिः परमं ब्रह्म परमं महदच्युतः ।
तस्मान्न मुक्ता न च सा न क्वचिद् विष्णुवैभवम् ।
प्राप्नुवन्ति स एवैकः स्वतन्त्रः पूर्णषड्गुणः ॥

इति परमश्रुतिः ।

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
ब्रह्मेशानादिभिः देवैः यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभावः कैवल्यं स भवान् केवलो हरे ॥ इति च ।
यथापि यन्ति तेजांसि महातेजांसि भास्करे ।
पृथक् पृथक् स्थितान्येव तदन्येषामदर्शनम् ।
अप्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचित् ॥
इति नारायणश्रुतिः ।

अतः सर्वागमविरुद्धमेव जीवेश्वरैक्यम् ।

The passage 'One who knows Brahman will become Brahman only' means that he attains greatness (It does not mean that he will attain identity with Brahman). This passage has to be understood like the statement that 'A Śūdra who worships a Brāhmaṇa with devotion will become a Brāhmaṇa'. A Śūdra who worships a Brāhmaṇa will not become the same Brāhmaṇa.

All Jīvas are called Brahma, the liberated Jīvas are called Parabrahma, Prakṛti i.e., Lakshmi is called Paramabrahma and Lord Achyuta is called Parama-mahadbrahma. Therefore, neither the liberated nor Prakṛti i.e., Lakshmi has the glory of Lord Vishṇu. He alone is independent, infinite and has the six attributes.

You are infinite with an immeasurable form. They cannot achieve your greatness.

The Supremacy that cannot be achieved by the Chaturmukhabrahma, Siva is yours. It is very natural to you.

Just as all other luminaries, though distinct from the great luminary the Sun, are not visible in his presence, the liberated Jīvas, though distinct from the Supreme God, are not observed in his presence. This kind of unobservedness is called Apyaya. This expression does not convey the identity.

Thus says Nārāyaṇa Śruti. Therefore, the idea of Jīveśvaraikya i.e., the identity of Jīva and Brahman is against all scriptures.

Expl. (1) In this section it is pointed out that certain passages like 'ब्रह्मविद् ब्रह्मैव भवति' do not support जीव—ब्रह्मैक्य. These only say that the liberated Jīvas attain a certain amount of glory. But never attain the glory of the Supreme God, much less an identity with him.

(2) The passage 'ब्रह्मविद् ब्रह्मैव भवति' means 'He who knows Brahman will attain Brimhitatva i.e., certain amount of greatness. ब्रह्मशब्दः बृंहणयोगनिमित्तकः ।

This passage could be interpreted in another way also. The Jīva who knows Brahman will remain Jīva only (even after knowing him). आद्यः ब्रह्मशब्दः परमात्मवाची द्वितीयः जीववाची । ततश्च यद्यपि जीवः परमं ब्रह्म वेद तथापि ब्रह्मैव जीव एव भवति । न तु पारतन्त्र्यादिरूपं जीवभावं परित्यज्य कदापि परमात्मत्वं प्राप्नोति ।

(3) In the passage 'ब्रह्माणि जीवाः सर्वेऽपि' etc., the expression ब्रह्म is used with reference जीव, परब्रह्म with reference to मुक्त जीव, परमब्रह्म with reference to Prakṛti i.e., Mahālakshmi and परममहद् ब्रह्म with reference to the Supreme God.

Criticism of Ekajivavada

66. वि. नि.—तथैव सर्वयुक्तिविरुद्धं च। न तावदेकजीववादो युज्यते। एकाज्ञानपरिकल्पितत्वे च सर्वस्य सर्वमिदं परिकल्पितमिति जानतः पुनः शिष्यादिबोधनं न युज्यते।

नहि स्वप्नोऽयमिति निश्चित्य स्वप्नपुत्रदायार्थं यतते। स्वप्ने तु स्वाप्नत्वाज्ञानादेव यतते।

न च बहूनां दृश्यमानत्वादस्याज्ञानपरिकल्पितमिदमिति निश्चयो युज्यते। स्वप्ने तु प्रबोधानन्तरमेकस्यावशिष्टत्वान्निश्चयः। न चात्र तथास्ति।

तस्य तस्य तथा तथा प्रतिपत्तव्यमित्यङ्गीकारे वस्तुनि विकल्पासम्भवात् अकल्पितमित्येव स्यात्। न च तथा प्रतिपत्तव्यमित्यत्र प्रमाणमस्ति।

In the same way Jīvaiśvaraikya is against all reasons also. The doctrine that only one Jīva is affected with ajñāna is not tenable. If all are projected by one Jīva's ajñāna, then, he who knows that all these are projected by one Jīva's ajñāna (i.e., his own ajnāna) cannot proceed to instruct his disciples. One who knows that he is undergoing a dream will not undertake any effort to distribute his property to the dream children. But in the dream itself he may do so as he is not aware that he is undergoing a dream.

Further, as there are many projecting themselves as teachers, it cannot be determined by whose ajñāna all these are projected. In case of dream, after one is awake he only remains. This is not the case in the case of Ajñāna.

It cannot be said that 'let each one think that all are projected by his ajñāna'. There cannot be many variants of the same thing. Therefore, the correct position is, these are not projected.

Further, there is no proof to hold that each one should think that these are projected by his own ajñāna.

Expl. (1) In this section एकजीववाद doctrine of Advaita is refuted.

Among एकजीववादिन्s there are three groups :

(i) केचित् मायावादिनः जीवजडेश्वरकल्पनानिमित्तं अज्ञानं उपाध्यवच्छिन्नजीवाश्रितं मन्यन्ते ।

Some of the Advaitins hold the view that the Ajñāna that projects Jīvas, Jada, and Īśvara is connected with one Jīva.

(ii) सत्यज्ञानानन्दस्वरूपब्रह्माश्रितमिति ।

Some other Advaitins hold the view that the Ajñāna is connected with Brahman who is of the nature of Satya, Jñāna and Ānanda.

(iii) अपरे तु जीवत्वब्रह्मत्वविवक्षां विहाय स्वरूपमात्राश्रयं जीवभागपक्षपाति यथा दर्पणः बिम्बप्रतिबिम्बविवक्षां विना मुखमात्रसम्बन्धी प्रतिबिम्बपक्षपातीति ।

Still other Advaitins hold that the Ajñāna is connected with the चिन्मात्रस्वरूप without any particular reference to either जीव or ब्रह्मन् but its effect is with reference to Jīvas just as a mirror is connected with the face without any particular reference to बिम्ब or प्रतिबिम्ब but it is effective with reference to प्रतिबिम्ब.

Among these three views the view that states that Ajñāna is connected with Jīva is criticised here. तत्र ये जीवाज्ञानवादिनः तान् प्रति इदं दूषणम् ।

(2) The first point of criticism levelled against एकजीवाज्ञानवादिन् is as under:

The one Jīva whose Ajñāna has projected the other Jīvas and Jada is known or not? If he is known, whether he is Guru or Śiṣya? If he is Guru, then, he already knows that it is his Ajñāna that is responsible for the projection of other Jīvas and Jada. Therefore, it is he who has to get rid of Ajñāna. No useful purpose will be served by teaching Vedānta to those who have no Ajñāna of their own, nor it is within their power to get rid of Ajñāna that is connected with some one else (the so called अज्ञानाश्रय एकजीव). This criticism is stated as एकाज्ञानपरिकल्पितत्वे च सर्वस्य सर्वमिदं परिकल्पितमिति जानतः पुनः शिष्यादिबोधनं न युज्यते। (V.T.N.)

This is further explained in Śrī Jayatīrtha's Tīkā as under:

सर्वस्य कल्पकः जीवः अमुकः इति निश्चितः न वा। आद्ये किमसौ इदानीं ऐक्यप्रवणः भेदप्रवणो वा । प्रथमे किं गुरुः शिष्यो वा। आद्ये दोषमाह—एकाज्ञानपरिकल्पितत्वे इति ।

विदिततत्वो हि गुरुः भवति। ततश्च सर्वमिदं जीवजडात्मकं मदविद्याकल्पितमिति जानतः नरान्तरबोधनं न युज्यते। शिष्यादीनां कल्पितत्वेन मोक्षरहितत्वेन निश्चितत्वात्।

The uselessness of any teaching to others by such a Guru is explained by the illustration of a person trying to distribute the property to the dream children after he is out of dream.

This dream example is given from the Advaitin's point of view of a dream. According to Dvaita, the dream objects are true. **परप्रसिद्धया च इदं दृष्टान्ताभिधानम् । स्वपक्षे स्वप्नस्य सत्यत्वात् ।**

An example from the point of view of both is also given in the Tīkā.

उभयप्रसिद्धया तु मृतपुत्रः भ्रान्त्या पुत्रं प्रतीत्य भ्रान्तेः उत्थितः कल्पित एवायमिति निश्चित्य तदीयदायार्थं न हि यतते इति दृष्टान्तः अभिधातव्यः ।

A person whose son is dead but who unfortunately sees him in a delusion, but soon realises that he is no more, will not make any effort to give his property to the son seen in the delusion.

The point made here is that a person who is out of illusion will not deal with the persons who belong to the arena of illusion. Presently the **गुरु** who is so called **एक-जीव** and has been **अज्ञानाश्रय**, if **ऐक्यप्रवण** i.e., has realised **जीवब्रह्मैक्य**, then, he knows that all others are projections of his Ajñāna. Therefore, there is no point in his proceeding to teach others.

One can urge again on this saying that though the Guru has realised **जीवब्रह्मैक्य**, this is still not completely ripe. Therefore, he still sees his disciples around and teaches them.

गुरुः विदिततत्वोऽपि ज्ञानस्य अपरिपक्वत्वात् । अविद्यायाः कार्त्स्न्येन अनिवृत्तत्वात् शिष्यादिकं पश्यति । अतस्तन्मोक्षार्थं बोधनं कुर्यात् ।

This contention is not correct. The Guru cannot proceed to teach them by merely seeing them around. He

should be unaware of their being projected. Being ऐक्य-प्रवण he is now aware that they are projected. Therefore, he will not proceed to teach them. During the dream one is not aware that he is in the dream and therefore, deals with the dream persons. He will not deal with them after he is out of dream. Merely seeing the disciples around is not sufficient to deal with them. One should also be aware that they are not projected. But the ऐक्य-प्रवण गुरु is aware that they are projected.

न प्रवृत्तौ दर्शनमात्रं कारणं किन्तु कल्पितत्वाज्ञानसहितम्। अतः गुरुः शिष्यादिकं पश्यन्नपि कल्पितत्वनिश्चयात् न प्रवर्तेतैव।

It cannot also be urged that the Guru proceeds to teach Vedānta to the disciples by force of habit. Because, there can be force of habit in other matters. But this force of habit cannot nullify his ब्रह्मैक्य knowledge and the consequent knowledge of others being mere projection.

संस्कारात् प्रवृत्तिः इत्यपि न युक्तम्। नहि अयं वेगादिवत् बलात् प्रवर्तयति। किन्तु निश्चितार्थानुसन्धानप्रतिबन्धेन। ततश्च भिक्षाटनादौ घटतां नाम कथञ्चित् प्रवृत्तिः। अद्वैतं बोधयंस्तु कथं तदनुसन्धान-हीनः स्यात्।

(3) Further, many claim to be Gurus in Advaita circle. Therefore, it is difficult to decide as to who is अज्ञानाश्रय among these Gurus.

सर्वेऽपि गुरवः कल्पकाः किं वा कश्चिद् गुरुः। नाद्यः। एक-जीववादपरित्यागापत्तेः। द्वितीये दोषमाह न च बहूनामिति।

In the case of dream, after the dream is over, it becomes clear as to who had the dream; but not in this case of अज्ञानाश्रय जीव.

It cannot also be said—let each Guru think that मद्ज्ञानपरिकल्पितं सर्वं अहमेव परमात्मा. In this case, the question will arise whether such a thought is true in the case of one of the Gurus or all Gurus. In case it is only one of them, then, the question of identifying him remains undecided. The other alternative of all being true is not possible, because, the truth of one negates the truth of the other. This leads to the conclusion that all of them are not true; that is to say, the thought that मद्ज्ञानकल्पितं सर्वं is not true in the case of all of them. The result will be none of them is अज्ञानकल्पित. Thus the very theory of अज्ञानकल्पितत्व collapses.

67. वि. नि. — शिष्याज्ञानपरिकल्पितमित्यङ्गीकारे तस्यैवाचार्यभावे स्वयमेव कल्पितो भवतीति सम्यग् ग्रन्थाधिगमस्यैव अनर्थहेतुत्वं स्यात्। न च कस्यचिन्मुक्तिः। ग्रन्थाधिगमे तस्यैव शिष्याज्ञानपरिकल्पितत्वप्राप्तेः।

स चैकजीवो यदि भेदवादी भवति तस्य तत्रैव दार्ढ्यात् न कदाचित् भेदनिवृत्तिरिति न कस्यापि मुक्तिः स्यात् तेन यथा कल्पितं तथैव भवतीति तेन एकजीववादिनां नित्यनिरयकल्पने स एव स्यात्।

न च एकजीवाज्ञानपरिकल्पितं समस्तमित्यत्र किञ्चिन्मानमस्ति।

In case it is Ajñāna connected with the disciple that is responsible for the projection of all, then, when such a disciple becomes a Guru, he will realise that he is projected by the Ajñāna of his disciple and it is not in his hands to get out of it. Thus, his very understanding of the scriptures will be a disadvantage for him.

